This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

303

काव्यप्रकाशटी० प० २९

Chocked 2012

Acc-No! - ~~1100~~ M1345
Title! - काव्यप्रकाशटीका
Subject! - Rhetoric.
~~पेज~~ ! - ~~२१~~ 25

K K S U LIBRARY
RAMTEK
441 106
M1345
Dist Nagpur

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ श्रीगोपालकृष्णायनमः॥ ग्रंथारंभे विघ्नविघाताय समुचितेष्टदेवतां ग्रंथकृत्परामृशति॥ नियति
कृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्रां॥ नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥ नियति
नियतरूपा सुखदुःखमोहस्वभावा परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतंत्रा षड्रसा न च तैर्हृद्या
च ब्रह्मणो निर्मितिर्निर्माणं एतद्विलक्षणा तु कविवाङ्निर्मितिः अत एव जयति॥ जयत्यर्थेन च नमस्कार आ
क्षिप्यते इति तां प्रत्यस्मि प्रणत इति लभ्यते॥ इहाभिधेयं सप्रयोजनमित्याह॥ काव्यं यशसेऽर्थकृते व्यवहा
रविदे शिवेतरक्षतये॥ सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे॥ कालिदासादीनामिव यशः श्री
हर्षादेर्धावकादीनामिव धनं। राजादिगतोचिताचारपरिज्ञानं। आदित्यादेर्मयूरादीनामिवानर्थनि
वारणं। सकलप्रयोजनमौलिभूतं समनंतरमेव रसास्वादनसमुद्भूतं विगलितवेद्यांतरमानं
दं। प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दा
र्थयोर्गुणभावेन रसांगभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविक
र्म तत्कांतेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायो
ग्यं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयं॥ एवमस्य प्रयोजनमुक्त्वा कारणमाह॥ शक्तिर्नि
पुणता लोकशास्त्रकाव्याद्यवेक्षणात्॥ काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥

शक्तिः कवित्वबीजरूपः संस्कारविशेषः। यां विना काव्यं न प्रसरेत्। प्रसृतं वा उपहसनीयं स्यात्॥ लोकस्य स्थाव
रजंगमात्मकलोकवृत्तस्य। शास्त्राणां छंदोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादि
लक्षणग्रंथानां। काव्यानां च महाकविसंबंधिनां। आदिग्रहणादितिहासादीनां च विमर्शनाद्व्युत्पत्तिः। काव्यं कर्तुं
विचारयितुं च ये जानंति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिः इति त्रयः। समुदितान तु व्यस्ता
स्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः॥ एवमस्य कारणमुक्त्वा स्वरूपमाह॥ तददोषौ शब्दा
र्थौ सगुणावनलंकृती पुनः क्वापि॥ दोषगुणालंकारा वक्ष्यंते। क्वापीत्यनेनैतदाह। यत्सर्वत्र सालंकारौ
क्वचित्तु स्फुटालंकारविरहेपि न काव्यत्वहानिः। यथा। यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते
चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः॥ सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रे
वारोधसि वेतसीतरुतले चेतः समुत्कंठते॥ अत्र स्फुटो न कश्चिदलंकारः रसस्य हि प्राधान्यान्नालं
कारता। तद्भेदान्क्रमेणाह॥ इदमुत्तममतिशयिनि व्यंग्ये वाच्याद्ध्वनिर्बुधैः कथितः॥ इदमिति काव्यं बुधै
र्वैयाकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यंजकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः ततस्तन्मतानुसारिभिरन्यै
रपि न्यग्भावितवाच्यव्यंग्यव्यंजनक्षमस्य शब्दार्थयुगलस्य। यथा। निःशेषच्युतचंदनं स्तनतटं नि
र्मृष्टरागोधरो नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः॥ मिथ्यावादिनि दूति बांधवजनस्याज्ञा

(२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपीउगमे वापीस्नानुमितोगतासिन पुनस्तस्याधमस्यांतिकं॥ अत्र अधमपदेन तदंतिकमेव रंतुं गतासीति प्राधान्येन
व्यज्यते॥ अतादृशि गुणीभूतव्यंग्यं व्यंग्ये तु मध्यमं॥ अतादृशि वाच्यादनतिशायिनि। यथा॥ ग्रामतरुणं तरुण्या नव
वंजुलमंजरीसनाथकरं॥ पश्यंत्या भवति मुहुर्नितरां मलिना मुखच्छाया॥ शब्दचित्रं वाच्यचि॥ त्रमव्यंग्यंत्ववरं स्मृतं॥
चित्रमिति गुणालंकारयुक्तं अव्यंग्यमिति स्फुटप्रतीयमानार्थरहितं अवरं अधमं यथा॥ ४ अत्र वंजुललतागृहे दत्त
संकेता नागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारकारित्वात्॥ ५॥ स्वच्छंदोच्छलदच्छकच्छकुहरच्छा
तेतरांबुच्छटामूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः॥ भिंद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रुमद्
मद्रोहोद्रेकमयोर्मिमेदुरमदा मंदाकिनी मंदतां॥ विनिर्गतं मानदमात्ममंदिराद्भवत्युपश्रुत्य यदृच्छयापि यं
ससंभ्रमेंद्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती॥ काव्यप्रकाशे काव्यप्रयोजनकारणस्वरूपविशेष
निर्णयो नाम प्रथम उल्लासः॥ श्री॥ क्रमेण शब्दार्थयोः स्वरूपमाह॥ स्याद्वाचको लाक्षणिकः शब्दोत्र व्यं
जकस्त्रिधा॥ अत्रेति काव्ये एषां रूपं वक्ष्यते॥ वाच्यादयस्तदर्थाः स्युः॥ वाच्यलक्ष्यव्यंग्याः॥ तात्पर्यार्थोपि
(तन्विताभिधानवादिमतेषु) केषुचित्॥ आकांक्षासंनिधियोग्यतावशाद्वक्ष्यमाणरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरप
दार्थोपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतं वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादि
नः॥ सर्वेषां प्रायशोर्थानां व्यंजकत्वमपीष्यते॥ तत्र वाच्यस्य यथा॥ माए घरोवअरणं अज्ज हु णत्थि

श्री ॥२॥

श्री ॥२॥

त्ति साहिअं तुमए॥ ता भण किं करणिज्जं एमेअ ण वासरो ठाइ॥ अत्र स्वैरविहारार्थिनीति व्यज्यते। लक्ष्यस्य यथा॥
साहेंती सहि सुहअं खणे खणे दूमिआसि मज्झ कए॥ सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए॥
अत्र मत्प्रियं रमयंत्या त्वया शत्रुत्वमाचरितमिति लक्ष्यं। तेन कामुकविषयं सापराधत्वप्रकाशनं व्यंग्यं॥ व्यंग्य
स्य यथा॥ उअ णिच्चल णिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ। णिम्मलमरगअभाअणपरिट्ठिआ संख
सुत्तिव्व॥ अत्र निःस्पंदत्वेनाश्वस्तत्वं तेन जनरहितत्वमतः संकेतस्थानमिति कयापि कंचित्प्रत्युच्यते
अथवा मिथ्या वदसि न त्वमत्रागतोभूरिति व्यज्यते॥ वाचकादीनां क्रमेण स्वरूपमाह॥ साक्षात्संकेतितं
योर्थमभिधत्ते स वाचकः॥ इहागृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात्। संकेतसहाय एव शब्दो
र्थविशेषं प्रतिपादयतीति यत्र यस्याव्यवधानेन संकेतो गृह्यते स तस्य वाचकः॥ संकेतितश्चतुर्भेदो जात्यादि
र्जातिरेव वा॥ यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानंत्याद्व्यभिचाराच्च तत्र संके
तः कर्तुं न युज्यत इति गौः शुक्लः चलो डित्थ इत्यादीनां शब्दानां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सं
केतः॥ उपाधिश्च वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च। वस्तुधर्मः सिद्धः साध्यश्च। सिद्धोपि द्विविधः। पदा
र्थस्य प्राणदः विशेषाधानहेतुश्च। आद्यो जातिः। उक्तं हि वाक्यप्रदीये गोः स्वरूपेण न गौर्नाप्यगौर्गोत्वाभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेवधानुगो रिति॥ द्वितीयो गुणः॥ शुक्लादिना हि लब्धसत्ताकं वस्तु विशेष्यते साध्यः पूर्वापरीभूतावयवक्रियारूपः॥
डित्थादिशब्दानां अन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषु उपाधित्वेन संनिवेश्यत इ
ति स संज्ञारूपो यदृच्छात्मक इति॥ गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः॥ परमा
ण्वादीनां गुणमध्यपाठात् पारिभाषिकं गुणत्वं। गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदात् भे
द इव लक्ष्यते। यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालंबनभेदात्॥ हिमपयःशंखाद्याश्रयेषु परमार्थतो भिन्ने
षु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यं गुडतंडुला
दिपाकादिष्वेवमेव पाकादित्वं बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थादिके कैश्चि
दुक्त इति ग्रंथगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितं॥ स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते स
श्री ।।३।। इति साक्षात् संकेतितः अस्येति शब्दस्य॥ मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्॥ अन्योऽर्थो लक्ष्यते यत्सा ल
क्षणारोपिता क्रिया॥ कर्मणि कुशल इत्यादौ दर्भग्रहणाद्ययोगात्। गंगायां घोष इत्यादौ च गंगादीनां घोषाद्याधि
करणत्वासंभवात्। मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च संबंधे रूढितः प्रसिद्धेः। तथा गंगातटे श्री
घोष इत्यादिप्रयोगाद्येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनेन ।।३।।

च मुख्येन अन्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सांतरार्थनिष्ठो लक्षणा॥ स्वसिद्धये पराक्षेपः परार्थं स्वसम
र्पणं। उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा॥ कुंताः प्रविशंतीति यष्टयः प्रविशंतीत्यादौ कुंतादिभिरात्मनः प्रवेशसिद्ध्य
र्थं स्वसंयोगिनः पुरुषा आक्षिप्यंते इति उपादानेनेयं लक्षणा॥ गौरनुबंध्य इत्यादौ श्रुतिचोदितमनुबंधनं कथं मे
स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति न्यायादित्युपा
दानलक्षणा तु नोदाहर्तव्या। न ह्यत्र प्रयोजनमस्ति न वा रूढिरियं। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते।
यथा क्रियतामित्यत्र कर्ता कुर्विति कर्म प्रविश पिंडीमित्यादौ गृहं भक्षयेत्यादि च। पीनो देवदत्तो दिवा न भुंक्ते इ
त्यत्र रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेर्दृष्टार्थापत्तेर्वा विषयत्वात्। गंगायां घोष इत्यत्र तटस्य घोषाधिकरणतासि
द्धये गंगाशब्दः स्वार्थमर्पयतीत्येवमादौ लक्षणेनैषा लक्षणा॥ उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात्॥
अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यं। तटादीनां गंगादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्र
तिपिपादयिषितप्रयोजनसंप्रत्ययः। गंगासंबंधमात्रप्रतीतौ तु गंगातटे घोष इति मुख्यशब्दाभिधानाल्ल
क्षणायाः को भेदः॥ सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा। आरोप्यमाण आरोपविषयश्च यत्रानप
ह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा॥ विषय्यंतःकृतेऽन्यस्मिन् सा स्यात्साध्यवसा
निका॥ विषयिणा आरोप्यमाणेन अंतःकृते निगीर्णे अन्यस्मिन् आरोपविषये सति साध्यवसाना। भे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री ११४

दाविमौ च सादृश्यात् संबंधांतरतस्तथा॥ गौणौ शुद्धौ च विज्ञेयौ॥ इमावारोपाध्यवसानरूपौ सादृश्याद्धेतोर्भेदौ
गौर्वाहीक इत्यत्र गौरयमित्यत्र च। अत्र हि स्वार्थसहचारिणो गुणा जाड्यमांद्यादयो लक्ष्यमाणा अपि गोशब्दस्य
परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयांतीति केचित्॥ स्वार्थसहचारिगुणाभेदेन परार्थगुणा एव लक्ष्यंते न तु परार्थो
ऽभिधीयत इत्यन्ये॥ साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे॥ उक्तं चान्यत्र अभिधेयाविनाभूतप्रती
तिर्लक्षणोच्यते॥ लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता इति॥ अविनाभावोत्र संबंधमात्रं न तु नांतरीयकत्वं
तत्त्वे सति मंचाः क्रोशंतीत्यादौ लक्षणा न स्यात्। अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्यु
क्तं॥ आयुर्घृतमायुरेवेदमित्यादौ सादृश्यादन्यत्कार्यकारणभावादिसंबंधांतरं एवमादौ च कार्यकारण
भावादिलक्षणपूर्वकसारोपाध्यवसाने अत्र गौणभेदयोर्भेदेपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयो
जनं शुद्धभेदयोस्त्वन्यवैलक्षण्येनान्यविचारेण च कार्यकारित्वादिकं चिंतादर्थ्यादुपचारः यथेंद्रार्था स्थूणा
इंद्रः। क्वचित्स्वस्वामिसंबंधाद्यथा राजकीयपुरुषो राजा। क्वचिदवयवावयविभावाद्यथा अग्रहस्त इत्यत्र अ
ग्रमात्रेवयवे हस्तः। क्वचित्तात्कर्म्यात् यथा अतक्षा तक्षा॥ लक्षणा तेन षड्विधा। आद्यभेदाभ्यां सह सा।
व्यंग्येन रहिता रूढौ सहिता तु प्रयोजने प्रयोजनं हि व्यंजनव्यापारगम्यमेव तच्च गूढमगूढं वा॥ तत्र गू
ढं व्यंग्यं। यथा मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसंस्थामतिः

श्री ४

उरो मुकुलितस्तनं जघनमंसबंधोद्धुरं बतेंदुवदनातनौ तरुणिमोद्गमो मोदते॥ अगूढं यथा॥ श्रीपरिचयाज्ज
डा अपि भवंत्यभिज्ञा विदग्धचरितानां उपदिशति कामिनीनां यौवनमद एव ललितानि॥ अत्रोपदिशतीति अना
यासेन शिक्षादानमभिधेयवत्स्फुटं प्रतीयते॥ तद्भेदाः कथितास्त्रिधा। अव्यंग्या गूढ अगूढव्यंग्या च॥ तद्भूल
क्षणिकः शब्दः इति संबध्यते॥ तद्भूस्तदाश्रयः। तत्र व्यापारो व्यंजनात्मकः कुत इत्याह॥ यस्य प्रतीतिमाधातुं
लक्षणा समुपास्यते। फले शब्दैकगम्येत्र व्यंजनान्नापरा क्रिया॥ प्रयोजनप्रतिपिपादयिषया यत्र लक्षण
या शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिरपि तु तस्मादेव शब्दात् तत्र चास्य व्यंजनादते नान्यो व्यापारः। तथाहि॥ ना
भिधा समयाभावात्॥ गंगायां घोष इत्यादौ पावनत्वादयो धर्मास्तटादौ प्रतीयंते तत्र गंगादिशब्दाः सं
केतिताः। हेत्वाभावान्न लक्षणा॥ मुख्यार्थबाधादित्रयं हेतुः। लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो॥ न
प्रयोजनमेतस्मिन्न च शब्दः स्खलद्गतिः॥ यथा गंगाशब्दः स्रोतसि सबाध इति तटं लक्षयति तद्वद्यदि त
टेपि सबाधः स्यात् तत्प्रयोजनं लक्षयेत्। न च तटं मुख्योर्थो नाप्यत्र बाधः। न च गंगाशब्दार्थस्य तटस्य
पावनाद्यैर्लक्षणीयैः संबंधः। नापि प्रयोजने लक्ष्ये किंचित्प्रयोजनं। नापि गंगाशब्दस्तटमिव प्रयोजनं
प्रतिप्रतिपादयितुमसमर्थः॥ एवमप्यनवस्था स्याद्या मूलक्षतिकारिणी॥ एवमपि प्रयोजनं चेल्लक्ष्य
ते तत्प्रयोजनांतरेण तदपि प्रयोजनांतरेणेति प्रकृताप्रतीतिकृदनवस्था स्यात्। ननु पावनादिध

(९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेसुक्तमेव तटं लक्ष्यते गंगायास्तटे घोष इत्यतो। धिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टलक्षणा तत
किं व्यंजनेनेत्याह॥ प्रयोजनेन सहितं लक्षणीयं न युज्यते॥ कुत इत्याह। ज्ञानस्य विषयो ह्यन्यः फलमन्यदु
दाहृतं। प्रत्यक्षादेर्नीलादिर्विषयः॥ फलं तु प्रकटता संवित्तिर्वा॥ विशिष्टे लक्षणा नैवं। व्याख्यातं। विशेषाः स्यु
स्तु लक्षिते। तटादौ विशेषाः पावनत्वादयः ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः तच्च व्यंज
नध्वननद्योतनादिशब्दवाच्यमवश्यमेषितव्यं॥ एवं लक्षणामूलं व्यंजकमुक्तं अभिधामूलं त्वाह॥ अनेका
र्थस्य शब्दस्य वाचकत्वे नियन्त्रिते। संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनं॥ संयोगो विप्रयोगश्च सा
हचर्यं विरोधिता॥ अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य संनिधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः
स्वरादयः॥ शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इत्युक्तदिशा॥ सशंखचक्रो हरिः अशंखचक्रो
हरिरित्युच्यते। रामलक्ष्मणाविति दाशरथी॥ रामार्जुनाविति भार्गवकार्तवीर्ययोः॥ स्थाणुं भज भव
च्छिदे इति हरे॥ सर्वं जानाति देव इति युष्मदर्थे॥ कुपितो मकरध्वज इति कामे। देवस्य पुरारातेरिति शंभौ॥
मधुना मत्तः कोकिल इति वसंते। पातु वो दयितामुखमिति सांमुख्ये। भात्यत्र परमेश्वर इति राजधानीरू
पाद् राजनि। चित्रभानुर्विभातीत्यह्नि रवौ। रात्रौ वह्नौ। मित्रं भातीति सुहृदि। मित्रो भातीति रवौ। इंद्र
श्री ॥५॥ शत्रुरित्यादौ वेद एव न काव्ये स्वरो विशेषप्रतिपत्तिकृत्। आदिग्रहणात्। एद्दहमेत्तत्थणिआ एद्दह श्री ॥५॥

मेत्तेहिं अच्छिवत्तेहिं॥ एद्दहमेत्तावत्था एद्दहमेत्तेहिं दिअहेहिं॥ इत्यादावभिनयादयः। इत्थं संयोगादिभिरर्थान्त
त्वे रभिधायित्वे निवारितेऽप्यनेकार्थशब्दस्य यत्क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा नियमनात्तस्याः न लक्ष
णा मुख्यार्थबाधाद्यभावात्। अपि त्वंजनं व्यंजनमेव व्यापारः। यथा। भद्रात्मनो दुरधिरोहतनोर्विशा
लवंशोन्नतेः कृतशिलीमुखसंग्रहस्य॥ यस्यानुपप्लुतगतेः परवारणस्य दानांबुसेकसुभगः सततं
करोऽभूत्॥ तद्युक्तो व्यंजकः शब्दः॥ तद्युक्तो व्यंजनयुक्तः। यत्सोऽर्थान्तरयुक् तथा॥ अर्थोऽपि व्यंजकस्तत्र सहकारित
यामतः॥ तथेति व्यंजकः। इति श्रीकाव्यप्रकाशे शब्दनिर्णयो नाम द्वितीयोल्लासः॥ अर्थाः प्रोक्ताः पुरा तेषां।
अर्थाः वाच्यलक्ष्यव्यंग्याः। तेषां वाचकलक्षकव्यंजकानां अर्थव्यंजकतोच्यते॥ कीदृशीत्याह। वक्तृबोद्ध
व्यकाकूनां वाक्यवाच्यान्यसंनिधेः॥ प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषां॥ योऽर्थस्यान्यार्थधीहे
तुर्व्यापारो व्यक्तिरेव सा॥ बोद्धव्यः प्रतिपाद्यः। काकुर्ध्वनेर्विकारः। प्रस्तावः प्रकरणं॥ अर्थस्य वाच्य
लक्ष्यव्यंग्यात्मनः। क्रमेणोदाहरणानि॥ अइपिहुलं जलकुंभं घेत्तूण समागदम्हि सहि तुरिअं। सम
सेअसलिलणीसासणीसहा वीसमामि खणं॥ अत्र चौर्यरतगोपनं गम्यते। ओणिद्दं दोब्बल्लं चिंता
अलसत्तणं सणीससिअं। मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ॥ अत्र दूत्यास्तत्कामुको
पभोगो व्यज्यते। तथा तं तोदग्रान्तपसद। सेपां चलतनयौवनेव्याधेः साधं सुचिरमुषितेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्कलधौतैः॥ चिरात्स्यावासे स्थितमनुचिना रन्ध्रनिरस्तं पुरः स्वेदं खिन्ने मयि नजति नाथापि कुरुषु। अत्र
मयि न योग्यः स्वेदः कुरु प्रसु योग्य इति काकुप्रकाश्यते॥ नन्ववश्यं सिद्धा गमनकाकुरिति गुणीभूतव्यंग्यत्वं
शीघ्रं प्रश्नमात्रेण काकोर्विश्रान्तेः॥ नइ आम हगे उच्छलणि मिअंदि ठिणा केसि अण्णतो॥ एतादृशे व्य
अर्हते अक्को लाणसाक्खिणी॥ अत्र मम सखीके पोलतले प्रतिबिम्बितो पूर्णचन्द्रः छिदन्ये याप्रत्ये। इदानी
चलितायां नूतनस्या मन्ये वज्ञातेत्याले हो प्रच्छन्नकामुकत्वं व्यज्यते॥ उद्देशोयं सरसकदलीश्रेणिशोभाति
शायी कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः॥ किं चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाताः ये
षामग्रे सरति कलिताकाण्डकोपो मनोभूः॥ अत्ररतार्थप्रविशेतिव्यंग्यं॥ णोल्लेइ अणोल्लमणा अ
त्ता मं घरभरम्मि सअलम्मि। खणमेत्तं जइ संझाइ होइ ण व होइ वीसामो॥ अत्र संध्या संकेतका
ल इति तटस्थं प्रतिक्रिया वियोस्यते॥ सुवइ समागमिस्सदि तुज्झ पिओ अज्ज पहर मेत्तेण। एमेअ किं त्ति चिट्ठ
सि ता सहि सज्जेसि करणिज्जं॥ अत्र नपपतिं प्रतिप्रस्थितस्त्वं प्रस्थितानानयुक्तमिति विवार्यते॥ अन्यत्र यूयं
कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः॥ नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोंजलिर्वः॥ अ
त्र विविक्तोयं देश इति प्रच्छन्नकामुकस्य याभिसर्ज्यते स्योव्यक्तो प्रतिक्रियाविद्योस्यते॥ गुरुअणपरव
स पिअ किं भणामि तुह मंदभाइणी अहअं। अज्ज पवासं वच्चसि वच्च सअं चेअ मुणसि करणिज्जं॥ ६५

अत्र अयमकृतपक्षमये यदि व्रजसि तदहं तावन्न भवामि तव तु न जानामि गतिमिति व्यज्यते॥ आदिग्रहणाच्चेष्टादेः॥ अ
त्र चेष्टा यथा॥ द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितं॥
आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने वाचस्तत्र निवारितं प्रसरणं संकोचिते दोर्लते॥ अत्र चेष्ट
या प्रच्छन्नकामुकविषय आकूतविशेषो ध्वन्यते॥ निराकांक्षप्रतीपत्तये प्राप्तावसरतया च पुनः पुनरुदाह्रियते॥
वक्त्रादीनां मिथःसंयोगे द्विकादिभेदेन अनेन क्रमेण लक्ष्यव्यंग्ययोश्च व्यंजकत्वमुदाहार्यं॥ अत्ता एत्थ णिमज्ज
इ एत्थ अहं दिअसअं पलोएहि। मा पहिअ रत्तिअंधअ सेज्जाए मह णिमज्जिहिसि॥ अत्र वक्तृबो
द्धव्यवैशिष्ट्यात् मम मत्रा स्वापोभिवपने निर्व्यंग्यं॥ शब्दप्रमाणवेद्योर्थो व्यनक्त्यर्थान्तरं यतः॥ अर्थस्य व्यंजकत्वे
तत्र शब्दस्य सहकारिता॥ शब्देति॥ नहि प्रमाणान्तरवेद्योर्थो व्यंजकः॥ ५०॥ इति श्रीकाव्यप्रकाशेऽर्थनिर्णयो नाम तृती
यउल्लासः॥ ५॥ यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालंकाराणां स्वरूपमभिधानीयं तथापि धर्मिणि
प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह॥ अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्व
नौ॥ अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतं॥ लक्षणामूलगूढव्यंग्यप्राधान्ये सत्येव विवक्षितं यत्र वाच्यं
सः ध्वनावित्यनुवादात् ध्वनिरिति विज्ञेयः॥ तत्र वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणतं यथा॥
त्वामस्मि वच्मि विदुषां समुदायोत्र तिष्ठति॥ आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्॥ अत्र वच

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाट्यैकपदेनादिरूपतया परिणमति। कश्चित्तु नरनुपपद्यमानत्वादसंगतमिति स्फुटं यथा। उपहतं बहुयत्नकिंतु न्यू
तेसु जनाता प्रथिता भवतापरं। विदग्धैर्दीन्द्रामेव सदा सरवेस्सुखितमा स्वततः शारदं वातं। एतदपकारिणं प्र
तिविपरीतलक्ष्याविक्ति। विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः। अन्यपरं व्यंग्यं निष्ठं एष च। को व्यलक्ष्य
क्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः। अलक्ष्येति। नखलु विभावानुभावव्यभिचारिण एव सरसः। अपितु र
संस्ते। द्रुतस्थिति क्रमः। सन लक्ष्यते। तत्र। रसभावतदाभासभावशान्त्यादिरक्रमः। भिन्नो रसाद्यलंकारा
दलंकार्यतया मतः। आदिग्रहणात् भावोदयभावसंधिभावशबलत्वानि। प्रधानतया यत्र स्थितो रसादिस्त
त्रालंकार्यः। यथोदाहरिष्यते। अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यंग्ये रसवत्प्रेय
ऊर्जस्विसमाहितादयोऽलंकाराः। ते च गुणीभूतव्यंग्याभिधाने उदाहरिष्यन्ते। तत्र रसस्वरूपमाह
स कारणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः। विभावा
अनुभावास्तत्कथ्यन्ते व्यभिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः। उक्तं च भरतेन। विभावा
नुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। एतद्विवृण्वते। विभावैर्ललनोद्यानादिभिः। आलंबनोद्दी
पनकारणैः। स्थायी रत्यादिको भावो जनितः। अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीति
श्री ॥७॥ योग्यतां नीतः। व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये श्री ॥७॥

तद्रूपतानुसंधानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः। राम एवायमयमेव राम इति न रामोऽय
मित्यौत्तरकालिके बाधे रामोऽयमिति। रामः स्याद्वा न वायमिति रामसदृशोऽयमिति सम्यङ्मिथ्यासंशय। श्री
सादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे। सेयं ममाङ्गे
षु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः। मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोच
रं गता। दैवादहमत्र तया तरलायतनेत्रया वियुक्तश्च। अविरलविलोलजलदः कालः समुपागतश्चा
यं इत्यादिकाव्यानुसंधानबलाच्छिक्षाभ्याससनिर्वर्तितस्वकार्यप्रकटनेन नटेनैव प्रकाशितैः कार्यका
रणसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद्गम्यगमकभावरूपादनुमीयमा
नोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्मी व
स्तुत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशंकुकः। न ताटस्थ्येन नात्मगतत्वेन रसः प्रती
यते नोत्पद्यते नाभिव्यज्यते अपितु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भा
वकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यत इति
भट्टनायकः। लोके प्रमदादिभिः कारणादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरे
व कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यपदेश्यैः ममैवैते

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री
१८

त्रास्त्रोरेवैतेनटस्थस्येवेतेनममैवैतेन त्रास्त्रोरेवैतेनटस्थस्यैवेतेद्गितिसंबाधविरोधस्वीकारपरिहार नियमानवस
यासाधारण्येनप्रतीतिरस्थियन्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन
स्थितोपि साधारणोपायबलात्तत्कालविगलित परिमितप्रमातृभावव्रशोन्मिषितवेद्यान्तरसंपर्कशून्यापरिमितभावेनप्र
बोधितः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वांगीणमिवालिंगन्नन्यत् सर्वमिव तिरोद
धत् ब्रह्मानंदास्वादमिवानुभावयन् लोकोत्तरचमत्कारकारी शृंगारादिको रसः। स च न कार्यो विभावादिविनाशेपि
तस्य संभवप्रसंगात्॥ नापि ज्ञाप्यः सिद्धस्य तस्यासंभवात्॥ अपि तु विभावादिव्यंजितः चर्वणीयः कारकज्ञापकाभ्यामन्यत्
क्व दृष्टमिति चेत्। न क्वचिद् दृष्टमित्यलौकिकसिद्धेर्भूषणमेतन्न दूषणं। चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति का
र्योप्युच्यतां। लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यव
सितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोप्यभिधीयतां। तद्ग्राहकं च न निर्वि
कल्पकं विभावादिपरामर्शप्रधानत्वात्॥ नापि सविकल्पकं चर्व्यमाणस्यालौकिकस्यानंदमयस्य स्वसंवेदनसिद्धत्वात्॥
उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदभिनवगुप्तपादाः॥
यीः। व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणां अश्रुपातादयोनुभावाः शृंगारस्येव करुणभयानकयोः
चिंतादयो व्यभिचारिणः शृंगारस्येव वीरकरुणभयानकानामिति पृथगनैकांतिकत्वात्सूत्रे मिलिता एव निर्दिष्टाः श्री

श्री
१८

विपदलिमलिनीं बुधामेमेघंमधुकरकोकिलकूजितैर्दिग्वांशाः॥ धरणिरभिनवांकुरांकटंकाप्रणतिपरेदयिते प्रसीदमुग्धे॥
इत्यादौ परिमर्दितमृणालीम्लानमंगं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु॥ कलयति च हिमांशोर्निःकलंकस्य ल
क्ष्मीमभिनवकरिदंतच्छेदकांतः कपोलः॥ इत्यादौ दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवस
नेकिंचांचितभ्रूलतं मानिन्याश्चरणानतिव्यतिकरे बाष्पांबुपूर्णेक्षणं चक्षुर्जातमहोप्रपंचचतुरं जातागसि प्रेयसि॥ इत्या
दौ यद्यपि विभावानुभावानामौत्सुक्यव्रीडाप्रहर्षकोपासूयाप्रसादानां व्यभिचारिणां केवलानामेवात्र स्थितिः॥
तथाप्येतेषामसाधारणत्वादन्यतमद्वयाक्षेपकत्वे सति नानैकांतिकत्वमिति॥ तद्विशेषानाह। शृंगारहास्यकरुण
रौद्रवीरभयानकाः॥ बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः। तत्र शृंगारस्य द्वौ भेदौ। संभोगो विप्रलंभश्च।
परस्परावलोकनालिंगनपरिचुंबनाद्यनंतभेदत्वादपरिच्छेद्य इत्येक एव गण्यते। यथा॥ शून्यं वासगृहं विलोक्य श
यनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं॥ विश्रब्धं परिचुंब्य जातपुलका
मालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता॥ तथा॥ त्वं मुग्धाक्षि विनैव कंचु
लिकया [illegible]सेमनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि॥ तल्पोपांतनिनिर
विष्टसस्मितसखीनेत्रोत्सवानंदितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः॥ अपरं त्व लि

(9)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाषविरहेर्ष्याप्रवासशापहेतुकइति पंच विधः क्रमेणोदाहरणं ॥ प्रेमार्द्राः प्रणयस्पृशः परिचया
दुद्गाढरागोदयास्तास्तामुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ॥ यास्वंतःकरणस्य बाह्यकरण
व्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानंदसांद्रोदयः ॥ अन्यत्र व्रजतीति का
खलु कथा नाद्यापि तस्य ताहक् सुहृद्यो मां नेच्छति नागतश्च सहसा कोयं विधेः प्रक्रमः ॥ इत्यल्पेतरकल्प
नाकवलितस्वांता निशां नांतरे बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥ एषा विरहोत्कं
ठिता ॥ सापत्यक प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्रमांगवलना
वक्रोक्तिसंसूचनं ॥ स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमे
व रोदिति लुठल्लोलालकैरश्रुभिः ॥ प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्ष
यितिकरव्याजेन गोपितं ॥ इत्यत्रेकतदित्यादीयसहसा तं संभ्रमाई मया साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या तु तद्विस्मृतं ॥ अ
त्रैकापत्यस्याक्रस्मिन्नुरायनेविपक्षरमणी नामग्रहमुग्धया सधः कोपपराङ्मुखशायितया चाटूनि कुर्वन्नपि ॥ आवेगादवधी
रितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणात् मा भूत्सुप्त इवेत्यमंदवलितग्रीवं पुनर्वीक्षितः ॥ अत्रौत्सुक्यस्य ॥ उत्सिक्तस्य तपःपराक्रम
निधेरभ्यागमादेकतः सत्संगप्रियता च वीररभसोत्फालश्च मां कर्षतः ॥ वैदेहीपरिरंभ एष च मुहुश्चैतन्यमामीलयन्नानं
दी हरिचंदनेंदुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥ अत्रावेगहर्षयोः ॥ क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत
सा दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कांतं मुखं ॥ किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्य
मुपेहि कः खलु युवा धन्योधरं धास्यति ॥ अत्र रतकौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानां ॥ भावस्थिति
रुक्तौचित्यादहृला च ॥ पुरस्थैरसपि तेगित्वं प्राप्नुवंति कदाचन ॥ तेभावशांत्यादयः ॥ अंगित्वं राजानुगतविवाहप्र
वृत्तभृत्यवत् ॥ अनुस्वानाभसंलक्ष्यक्रमो व्यंग्यस्थितिस्तु यः ॥ शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ॥
शब्दशक्तिमूलानुरणनरूपव्यंग्योर्थशक्तिमूलानुरणनरूपव्यंग्य उभयशक्तिमूलानुरणनरूपव्यंग्यश्चे
ति त्रिविधा तत्र अलंकारोथ वस्त्वेव शब्दा यत्रावभासते ॥ प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥ वस्त्वेवे
त्यनलंकारं वस्तुमात्रं ॥ आघायपाण्डुलस्य कालकरवालमहांबुवाहे दुवेनयपनरुद्धोटो जैतागजिततेन ॥ निर्वा
पितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥ अत्र वाक्यस्यासंबद्धार्थाभिधायकत्वं माप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

५५

सौक्षीदिस प्राकरणिकप्राकरणिकयोरुपमानोपमेयभावः कल्पनीयः। इत्यत्रोपमालंकारो व्यंग्यः। तिमस्थिरप्रता
या विधुरनिशा कृद्भिमा मधुरलीलः। मतिमाननत्वरूपिः प्रतिपदं क्षप्रणीर्विभतिभवान्। अत्रैकैकस्य पदस्य द्वि पर
द्विपदत्वे विरोधाभासः। अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदप्रभो। अहितः साधुपरोभिरसतामसि। अत्रापि वि सहितो:
रोधाभासः। निरुपादानसंभारमभित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने॥ अत्र व्यतिरेकः।
अलंकारस्यापि ब्राह्मणश्रमणन्यायेनालंकारता। वस्तुमात्रे यथा। पंथिअ ण एत्थ संत्थरमत्थि मणं पत्थरत्थले गा प
मे। उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु॥ पथिक नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे। उन्नतप
योधरं प्रेक्ष्य यदि वससि तदा वस॥ अत्र यद्युपभोगक्षमोऽसि तदास्वेति व्यज्यते। शनिरशनिश्च तमुच्चैर्निहन्ति कुप्य
सि नरेन्द्र यस्मै त्वं। यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च॥ अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरु
त इति ध्वन्यते॥ अर्थशक्त्युद्भवस्यार्थो व्यंजकः संभवी स्वतः। प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा। वस्तु वा नि वधस्य
लंकृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत्। वस्त्वलंकारमथवा तेनायं द्वादशात्मकः। द्वंद्व प्रथमकल्पितः। स्वतः संभवी अ २४
चेति द्विविधोऽर्थः॥ तत्र स्वतः संभवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरौचित्येन संभाव्यमानः॥ कवि
ना प्रौढोक्तिमात्रेण बहिरसंभविनिर्मितः कविनिबद्धवक्तृप्रौढोक्तिरिति द्विविधोऽपरः इति त्रिविधः। वस्तु वालंका श्री
श्री रो वेति षोढा व्यंजकः। तस्य वस्तु वालंकारो वा व्यंग्य इति द्वादशात्मकेऽर्थशक्त्युद्भवो ध्वनिः। क्रमेणोदाहरणं अ र ॥१२॥
॥१२॥

५२

लसिसिरमणी धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ। इअ भणिएण णअंगी पप्फुल्लविलोअणा जाआ॥ अलसशिरोमणि
धूर्तानामग्रिमः पुत्रि धनसमृद्धिमयः। इति भणितेन नतांगी प्रफुल्लविलोचना जाता॥ अत्र मय्येवोपभोग्य इति वस्तुना
वस्तु व्यज्यते॥ धन्यासि या कथयसि प्रियसंगमेऽपि विस्रब्धचाटुकशतानि रतान्तरेषु। नीविं प्रति प्रणिहिते तु कर स्व
रे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि॥ अत्र त्वमधन्याऽहं तु धन्येति व्यतिरेकालंकारः। दर्पांधगंधगज
कुंभकपाटकूटसंक्रांतिनिघ्नघनशोणितशोणशोचिः। वीरैर्व्यलोकि युधि कोपकषायकांतिः कालीकटाक्ष इव य य
स्य करे कृपाणः। अत्रोपमालंकारेण सकलरिपुबलक्षयः क्षणात्करिष्यत इति वस्तु। गाढकांतदशनक्षतव्यथासं
कटादरिवधूजनस्य यः। ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरं॥ अत्र विरोधालंकारेणाधरनि
इति तुल्य र्दशनसमकालमेव राजन्यो वैरिणामिति ताममपत्याप्यन्यस्य क्षतानि निवर्त्यताभिमतिन बुद्धिरुत्प्रेक्षा तत्स्फुटत्वे क्षा च
योगिता॥ एषूदाहरणेषु स्वतः संभवी व्यंजकः। कैलासस्य प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा कीर्तिं विबुधरमणीगी
यमानां यदीयां स्रस्तापांगाः सरसबिसिनीकांडसंजातशंकाः दिङ्मातंगाः श्रवणपुलिने हस्तमावर्तयंति। अत्र वस्तुना
येषामप्यधिगमो नास्ति तेषामप्येवमादि बुद्धिजननेन चमत्कारं करोति तव कीर्तिरिति वस्तु ध्वन्यते। केसेसु बलामोडि
अ तेण समरम्मि जअसिरी गहिआ। जह कंदराहिं विहुरा तस्स दढं कंठअम्मि संठविआ॥ केशेषु बलात्कारेण तेन समरे
जयश्रीर्गृहीता। यथा कंदराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिता॥ अत्र ==----

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गाढालिंगनरभसोद्यतेदयिते लघु समुपसरति। मनस्विन्या मानः भीत इव हृदयात् बहिर्याति॥७

केशाग्रहणावलोकनोद्दीपितमदनाइव कंदरास्तान् विधुरान् कण्ठग्रहणे इसु प्रेक्षाए कत्र संग्रामविजयदर्शनात्तस्यारयःप लायगुहासु तिष्ठंतीति काव्यहेतुः। नपलाय्य गतास्ते वैरिणापि लुलितः परा भवं संभाव्यता नूर्ध्वं दरान् स्यजंती स्वप्रकृति श्रवमा आलिंगणरहस्सुज्जुआ अभिदइ एल दुंसमासरइ॥ मंसी सिणीए माणापी लणमीरु व्वहिअआ हि। अत्रोत्प्रेक्षया प्रत्यालिंगनोद्यतत्वं भत इति वस्तु। ओठरे बहु ती कइव अणं कुरुह व ह्व विणिवेसादविंइ मुअणमंडलम्मि लोवि अअ अ इसा वाणी॥ अत्रोत्प्रेक्षया चमत्कारे कारणं नवं नवं जगद् रजसन स्थानिर्मिमीत इति व्यतिरेकः॥ए षुकवि प्रौढोक्ति मात्रनिष्पन्नः। जेलंकागिरिमेहलाहिं खलिदासंभोअरविलोरइ पारू फुल्लफणावलीव लणे पत्तादलिहत्तणं ति एद मलअ अनिल विरहिणीणी सासंसंपंचेणं आदा झत्ति सिसुत्तणं विव रहुलानारू ए पुत्ता विअ ये लंकागिरिमेखलाभ्यः स्खलिताः संभोगखिन्नोरगीस्फारोरफुल्लफणावलीकवलनेन प्रा प्तरिद्धत्वं तेइदानीं मलयानिला विरहिणीनिश्वाससंपर्कोणाआ नाझगिति शिशुत्वमिव बहलास्तरुणप पूर्णादिवा। अत्र निश्वासैः प्राप्ते ब्वयः किं किं न कुर्वंतीति वस्तुनावस्तु व्यज्यते। सहि विरइऊण माणस्स म स्स धीरत्तणेण आसासं। पियदंसणविहलंखण ंमि सहसत्ति तेण ओसरिअं॥ अत्र वस्तुना उत्तेपि प्रा र्थिनेप्रसन्नेतिविभावना। प्रियदर्शनस्य सौभाग्यबलं धैर्यं ण सोढुं न शक्यत इत्युत्प्रेक्ष्यते। ओल्लोल्लकरअ सखि विरच्यमानस्य मम धीरत्वेना श्वासं प्रियदर्शनविश्लेखलक्षणे सहसेति तेन समपसृतं॥२

कौतुकान रलिते

११७ ... ॥१३१७

ओर्णीत रसंमितवा चाअ संततिरस्कलवा च्या संलक्ष्य क्रमव्यंग्यात् इति त्रयः शब्दशक्तिमूलो व स्तव लं कृतिद्वर्थशक्तिमूला द्वादश उभयशक्तिमूल श्चैकः इति संकलनयाष्टादश ध्वनयः स्युः॥८

रअणेकखणिहिं तुहलोअणेसु मह दिण्णरत्तंसुअं पसाओ वेण पुणो इमेण अधिमिआ आढाईकरउअरदन क्षतेस्तना लोचनयोर्मम दत्तं रक्तांशुकं प्रसादः कोपेन पुनरिमेनाक्रांते॥ अत्र किमपि। लोचने कुपितेव हसितमिव रालेकारेण न केवलं आर्द्र नखक्षतानि गोपयसि यावत्तेषाम हे प्रसादपात्रं आतेति वस्तु। महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअंती अणुदिणमणणकम्मा अंगं तणुअंपि तणुएइ॥१॥ महिलासहस्रभरिते तव हृदये सुभग सा अमांती। अनुदिनमनन्यकर्मा अंगं तनुकमपि तनयति॥ अत्र हेतुवलंकारेण तनोस्तनूकरणेपि तव हृदये न वर्तत इति विशेषोक्तिः। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यंजकः। एवं द्वादशभेदः। शब्दार्थीभयभूरेकः। युग्मा॥ अतंद्रचंद्राभरणा समुद्दीपितमन्मथा। तारकातरला श्यामा सानंदं न करोति कं। अत्रोपमाव्यंग्या। भेदाअष्टादशास्य तत्। अस्य ध्वनेः। ननु रसादीनां बहुभेदत्वे कथमष्टादशेत्यत आह रसादीनामनंतत्वाद्भेद एको हि गण्यते। तथाहि॥ नवरसाः। अत्र भृंगारस्य द्वौ भेदौ। संभोगो विप्रलंभश्च। संभोगस्यापि परस्परदर्शनालिंगनपरिचुंबनाद्यनंतकुसुमोच्चयजलकेलिसूर्यास्तचंद्रोदयषट्ऋतुवर्णनादयो बहवो भेदाः। विप्रलंभस्याभि लाषादयउक्ताः। तयोरपि विभावानुभावव्यभिचारिवैचित्र्यं। तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वं। तत्रा पि देशकालावस्थाभेदइत्येकस्यैव रसस्यानंत्यं का गणनान्येषां। असंलक्ष्यक्रमत्वं तु सामान्यमाश्रित्य रसादिध्वनेरेक एव भेदो गण्यते। वैकल्पिकः ...थ इति या व्द्याप्यभिधेयशक्तिमूलः। पदे ... न्यो अपि शब्दकी एका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयवस्थितेन भूषणेन कामिनीवपदयोः सेनयं येन वा कार्य्यं प्यापि मारीत त्रासते॥ अत्र पद प्रकाशये क्रमेणोदाहर
णं। यस्यामित्राणि मित्राणि शत्रवः शत्रवस्तथा। अनुकंप्योनुकंप्यश्च स जातः स च जीवति॥ अत्र द्वितीयेपि त्रादिशब्दा
आभ्यस्त्वान पंत्रणत्वस्य हि पात्र यदि अर्थान्तरसंक्रमितवाच्यः। खलु ववहारा दीसंति दारुणा जहवि तहवि धी
राणं॥ हि अअववअस्स बहु मआणंड्र वव साआविमुअंति॥ खलव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि धीराणां॥
हृदयवयस्य बहुमता नैव खलु व्यवसायाविमुंचन्ति। अत्रविमुंचंतीतिलाक्षण्यं तदा सो कांतिस्तद्रूपं स च वचः क्रमः॥
तदा सुखास्यदमभूदधुनातु ज्वरो महान् अत्र तदादिपदैरनुभवैकगम्याः अर्थाः॥ प्रकाश्यते यथ वा मुग्धे
मुग्धतयेव नेतुमखिलः कालः किमारभ्यते मानं धत्स्व धृतिं बधान ऋजुतां दूरीकुरु प्रेयसि॥ सख्यैवंप्रतिबोधिता
प्रतिवचस्तामाह भीतानना नीचैः शंस हृदिस्थितोहि ननु मे प्राणेश्वरः श्रोष्यति॥ अत्र भीतानने सनेनाहृतनिचैः शंसनं
विधानस्य युक्ततागम्यते। भावादीनां पदप्रकाशः॥ यथा ऐथितं न वेचिन्त्यमिति नलदुदीप्तयतो रुधिरविसर प्रसाधि
तः करालवुरुवॉल रुधिरपु अपरिघः। प्रस्फुरित भृकुटि विटंकितललाटपटो विभासिनपभीमः॥ अत्र भीषणी
यस्य भीमसेन उपमानं। भुक्तिमुक्तिकृदेकांते समादेशान तत्परः। कस्य दानं दीनस्यं देव दधाति सदागमः॥ अ
वस्त्र २ त्रकाचिसंकेतदापि नमेवमुत्व्यथा दृस्या संशान्ति। सायं स्नानमुपासितं मलयजेनां गं समालेपितं यातो स्ताच
श्री लमौलिमेवं रमणी विस्त्रब्धमेतागतिः। आश्चर्यं तव सौकुमार्यमभितः क्लांतासि येनाधुना नेत्रद्वंद्वममी श्री

५१४ ॥१४

श्रीगणेशाय नमः॥ लनव्यापकरं शक्रोतितेनासितुं॥१॥ अत्र वस्तुना हृतपरपुरुषपरिचयाक्लांतासीति वस्त्वधुनापदद्योत्यं व्यज्यते।
तदप्राप्ति महादुःखविलीनाशेषपातका। तच्चिंताविमलाह्लादक्षीणपुण्यचया तथा॥१॥ चिंतयंती जगद्योनिं पर
परब्रह्मस्वरूपिणं। निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ अत्र जन्मसहस्रैरुपभोक्तव्यानि सुकृतदुःकृत
फलानि वियोगदुःखचिंतनाह्लादाभ्यामनुभूतानीत्युक्तं। एवं चअशेषचयपदद्योत्यमानं। क्षणदासा
वक्षणदा वनमवनं व्यसनमव्यसनं। वत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखे सर्वं॥ अत्र शब्दशक्तिमूल
रा विरोधाभोगेनार्थान्तरन्यासेन विधिरपि वाममनुवर्तत इति सर्वपपदद्योत्यं वस्तु। तुह वल्लहस्स गोसम्मि आसि अ
हरोमिलाणकमलदलो। इअ णव वहुआ सोउण कुणइ वअणं महीसमुहे॥ तव वल्लभस्य प्रातरासीदधरो म्लानकम
लदलः इति नववधूः श्रुत्वा करोति वदनं महीसमुखे॥ अत्र रूपकेण त्वया मुहुर्मुहुः परिचुंबनं कृतं येन म्लान तेभि
तिमिलाणादिपदद्योत्यं काव्यलिंगं॥ एषु स्वतः संभवी व्यंजकः। राईसु चंदधवलासु ललिअं अप्फालिऊण जो चावं।
मे एकछत्तं विअ कुणइ तिहुअणरज्जं विअंभंतो॥ पुनः चंद्रधवलासु ललितमास्फाल्य यश्चापं एकछत्रमिव करोति त्रि रा४
भुवनराज्यं विजृंभमाणः। अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेषां न कश्चिदपि तदादेशपराङ्मुखः
तिर्जयद्भिः रूपभोगपरैरेतैर्निशाति वाल्यते इति त्रिभुवनराज्यपदद्योत्यं वस्तु प्रकाश्यते॥ निशितशरधियार्प
यत्यनंगो दृशि सुदृशाः स्वबलं वयस्यराले। दिशि निपतति यत्र सा च तत्र व्यतिकरमेत्य समुन्मिषंत्यवस्थाः॥१॥

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र वस्तुना नायुगपद् वस्तुना परस्परं निरहूत्यपि प्रवर्तितेति व्यतिकरपदद्योत्यार्थो ध्वनिः। वारि ज्जंतो वि पुणो संदावकअत्थिएण हिअएण। थणहर वअंसएण विसुद्धजाई ण चलिज्जइ अ हारो॥
वार्यमाणोऽपि पुनः संतापकदर्थितेन हृदयेन। स्तनभरवयस्येन विशुद्धजातिर्न चलतीति तस्य हारः। अत्र विशुद्धजातित्वलक्षणहेत्वलंकारेण हारोऽनवरतं रूपमानइव स्तनइति नचलतीति पदद्योत्यं वस्तु। सो मुद्धसामलंगो धम्मिल्लो कलिअललिअणिअदेहो। तीए खंधाहि बलं गहिअ सरो सुरअसंगरे जअइ। स मुग्धः श्यामलांगो धम्मिल्लः कलितललितनिजदेहः। तस्याः स्कंधात् बलं गृहीत्वा स्मरः सुरतसंगरे जयति। अत्र रूपकेण मुहुर्मुहुः केशाकर्षणेन तस्याः केशपाशः स्कंधयोः प्रसारयति स्म यथा केशान्विरलतामनपास्य निवृत्ताभिलाषः कामुको मूर्द्धनि स्कंधपदद्योत्या विभावना। एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः॥ णवपुण्णिमामिअंकस्स सुहअ को तं सि भण मह सच्चं। का सोहग्गसमग्गा पओसरअणिव्व तुह अज्ज। नवपूर्णिमामृगांकस्य सुभग कस्त्वमसि भण मम सत्यं। का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य। अत्र वस्तुना मयीवान्यस्यामपि प्रथममनुरक्तस्त्वं नतस्तइति नवे त्यादिपदद्योत्यं वस्तु व्यज्यते। रसिहिणवलिद्धुअण समरसिसम्मि अंकपालीए सही। णिवरिआ णिअणं ण विरं लोतदोवहार मिअं। सखि नवनिधुवनसमरे अंकपाल्या सख्या निविडया। हारो निवारितएवउहृएवनेततः कुर्यें रमितं। अत्र वस्तुना हारच्छेदादनंतरमन्यदेवरतमवश्यमनुभूतं तत्कथयक्व दृश्यते इति व्यतिरेकः कथं पदद्योत्यः। पविसंती घरवारं विवलिअवअणा विलोइऊण पंथानं॥ खंधे घेतूण घडं हाहा णट्ठोत्ति रुअसि सहि किं ति॥ प्रविशंती गृहद्वारं विवलितवदना विलोक्य पंथानं।
श्री
११५६
श्री
११५५

स्कंधे गृहीत्वा घटं हाहा नष्ट इति रोदिषि सखि किमिति॥ अत्र हेत्वलंकारेण समस्तसंकेतनिकेतनं गतौ तेदृश्याय दित त्रगतं तु इद्ध सितद‍ परं घटं ग्रहित्वा गच्छन्ति वस्तु किमिति पदव्यंग्यपर्यंगा। विहलं खलं तुमे सहि दठूण कुडेण तरलतरदिट्ठिं। बारप्फंसमिसेण अप्पा गरुओत्ति पाडिओ भिण्णो। विभ्रंगलं त्वां सखि दृष्ट्वा घटेन तरलतरदृष्टिं। द्वारस्पर्शमिषेणात्मा गुरुक इति पातयित्वा विभिन्नः॥ अत्र नदीकूले लतागहने कृतसंकेतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगमनाय द्वारघाततया जेन बुद्धिपूर्वं व्याकुलया त्वया घटः स्फोटितइति मया चेतितं तत्किमिति नाभ्यसितीति तन्नामीहितसिद्धयेऽजअहे तेभ्य भ्रुनिकूटे सर्वं समर्पयिष्ये इति द्वारस्पर्शनव्याजेनेत्यपह्नुतावस्तुं जुता ड्रमहुरसेण अविइण्णतारुण्णउ सुअमणासा। बुड्ढाविणवोढ्ढ चिपरव्वदु अहहरइति हरिअ अंग्ये स्तयांमधुरसेन वावितीर्णतारुण्या स्तकमनाः सा। वृद्धापि नवोढेव परवधूर हहरतितवह दयीं। अत्र काव्यलिंगेन प्रह्वापरवधूवनअसामुद्रिसत्वामिलषसीति त्वदीयमाचरीतं व जुंनशक्यामसाक्षेपः परवधूपद प्रकाश्यः। एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्रकाश्यस्तु पूर्वमुदाहृतो तं शब्दार्थोभयशक्त्युद्भवस्तु पदप्रकाश्यो नभवतीति पंचत्रिंशद्भेदाः। प्रबंधेप्यर्थशक्त्युद्भवो यथा॥ गृध्रगोमायुसंवादो यदा॥ तथा च॥ अलं स्थित्वा श्मशानेस्मिन्गृध्रगोमायुसंकुले। कंकाल बहले घोरे सर्वप्राणिभयंकरे। न चेह जीवितः क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिकालधर्मत्तुणागतः॥ प्रियो वास्पदि वाहेष्यः प्रातिनो गतिरीदशी॥ इत्यत्र दिव्यागमवतो गर्भस्य पुरुषविसर्जनपरमिदं वचनं। आदिसोपं स्थितेनामूढाः स्नेहं कुरुत सीप्रतं वसुधा विधानादृत्ते यं अभीवेदीप कदाचन॥ अत्र मुनेन स्वर्णेन भं बाल मप्राप्तया वनै। गर्भ कषा कालं प्रथं दृष्टास्य अधर्मविरोधिताः॥ इति निश्चित्य विसर्जनमात्रस्य गोमायोर्जनव्या वर्तनेन निषेधं चेति प्रबंधस्य एव प्रथने॥ अन्येत्वेका दशाप्येदा यं परिस्वरमयान्नो दाहृताः॥ स्वयं तुल [illegible] ष्यतो नुसन्याः। अपि शब्दा [illegible] दवाक्यमोः। पदेकदेशरचना वर्णेष्वपि रसादयः॥ तत्र प्रकृत्याय यथा। गर इच्छालिहिअणि अंसणवरविसलअरुहूणअणत्तु अलस्सा रुद्दस्सतइअणअणं पव्वइपरिचुंविअंजअइ। रतिकेलिहृतनिवसनकररुद्धरालयरुद्रनयनयुगलस्य। रुद्रस्य तृतीयनयनं पार्वतीचुंबितं जयति। अत्र जयति तिन तु शोभतेइत्यादि समेनेपि पद्दिस्थेगनव्यपारोलोको त्तरेणैव रूपेणास्यापथी भितनदेवाहृष्टं। तथा। प्रेयान्सायमपाकृतः सशपथं पादानतः कांतया द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः। तावत्प्रत्युत पाणिसंपुटलसन्नीवीनिबंधं धृतो धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः। अत्र पादानि तिन तु धारादीनीति तिङ्सुपार्थ। पद्मिनीपदमुकुलं वनु चारु संमेल कुराणा दिशि दिशि [illegible] वमानो विरुधोलासकश्च। नरिनरि किरतिद्रा कुसा यक्षपुष्प धन्वा पुरि खनि धत्ता मानिनि मान चर्चा॥ अत्र किरतीति किरणस्य संधमानत्वेन प्रतेतिनि वर्तनस्य सिद्धत्वं तिङा सुपादीत त्राविपत्तमस्येन तितयं धारस्रते। यथा वा॥ लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो निराहाराः सख्यः सततरुदितोच्छूननयनाः। परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था चेयं विसृज कठिने मानमधुना। अत्र

श्री

१९६४

मा ० स १

पि तु प्रसादपर्यंतेरिति। तथा। अस्त इति न तु आसित इति॥ स्मिमिति। न तु स्मायितेति। नहि बुद्धिपरवर्केरूपकं किंचिल्लिखतीति इसु द्वि वचनानां यंगसंबंधस्य यथा। गामारुहम्मि गामे वसामि णअरठिइं ण आणामि। णाअरिआणं पइणो हरेमि जा होमि सा होमि॥ ग्रामारुहस्मि ग्रामे वसामि नगरस्थितिं न जानामि नागरिकाणां पतीन्हरामि याभवामि सा भवामि। अत्र नागरिकाणामिति षष्ठ्याः कमलीयः क्षत्रियकुमार आसीदिति कालस्य। एकाहि सत्तमो हस्थेरकार्मुकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः॥ वचनस्य यथा। ताणं गुण [illegible] ग्गहणाणं ताणं उक्कंठाणं तस्य पम्मस्स। ताणं भणिआणं सुंदर इरिस अंजाअमदसाणं। तेषां गुणग्रहणानां तासामुत्कंठानां तस्य प्रेम्णस्तेषां भणितानां सुंदर ईदृशी जातमवसानं। अत्र गुणग्रहणादीनां बहुत्वं प्रेमाश्चैकत्वं घोत्यते। पुरुषस्य यथा। रेरे चंचलकलोचनांचितरुचे चेतः प्रमुच्य स्थिरप्रेमाणं महिमानमेणनयना मालोक्य किं नृत्यसि। किं मन्ये विहरिष्यसे बत हतां मुंचांतराशामिमामेषा कंठतटे कृता खलु शिला संसार वारांनिधौ॥ अत्र प्रहासः। पूर्वनिपातस्य यथा। येषां दोर्बलमेव दुर्बलतया ते संमतास्तेरपि प्रायः केवलनीतिरीति शरणैः कार्यं किमुर्वीश्वरैः॥ ये क्ष्माशक्रपुनः पराक्रमनयस्वीकारकांतक्रमास्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परं॥ अत्र पराक्रमस्य प्राधान्यं गम्यते॥ विभक्तिविशेषस्य यथा॥ प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसं दिवसेन तु नरपसंयानृयुद्धकिंचिल्लिख साधुवादपदं॥ अत्रादि [illegible] वसेनेत्यपवर्गे तृतीयाफल

तु १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राप्तिं द्योतयति। कृपेति। कृपयेत्यर्थः। अविघ्नगरीरथ्यायां पर्यटंतं दृष्ट्वा दृष्ट्वा स्तवनवलक्ष्मीतुम वातायनस्था॥ साक्षात्कामं नवमिव र
तिर्मालती माधवं यत् गाढोत्कंठा लुलितलुलितैरंगकैस्ताम्यतीति। अत्रानुकंपावृत्तेः करुणरूपतद्धितस्य। परिच्छेदातीत:
सकल वचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो गतो यान॥ विवेकप्रध्वंसादुपचितमहामोहगहनो विका
रः कोप्यंतर्जडयति च तापं च कुरुते॥ अत्र प्रदेशे शब्दस्योपसर्गस्य॥ इतं च गर्वो किमु खंमन [illegible] स्त्र्या किमन्यदेवं निह
ताश्च नो द्विषः॥ तमांसि तिष्टंति हितावदंशुमान् न यावदायात्युदयाद्रिमौलितां॥ अत्र तुल्ययोगिता द्योतस्य चरतीति नि
पातस्य। रामोसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तं। बंदी वैष पत्री
भिगायति मरुच्चैकवाणाहति श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः॥ अत्रासाविति भुवनेष्विति गुणै
रिति सर्वनाम वचनप्रातिपदिकवचनानां तानयादिति न मदिति अपि त्वस्मदित्यस्य सर्वाक्षेपिणः॥ आग्या विपर्य
यादिति अन्यथासंपत्तिमुखेन न त्वभाव मुखेनापि ख्यातिस्यंतरं। णिमानिकलयति केलाम नुमदन धनुष्मुवोः
पठंत्यग्रे। अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना॥ अत्र इमनिज प्रत्ययस्य आवश्यक मर्थितो धारा
णां स्वरूपस्य तरण त्वदितिधनुषः समीपदति मोलौ वसतीत्यत्र [illegible] दिपि रित्तत्यैच्चेपो वाचकत्वे अस्तिकाश्रि स्वरू
ण्मी

श्री
११७॥

न

श्री
॥१७॥

[illegible] आणनाः पंचविंशति प्रबंधव्यंग्या अर्थं शक्त्युद्भवादेव अलक्ष्यक्रमस्य पदैकदेशा च नावर्णरचनाप्रबंधव्यंग्यत्वेनाय रसस्य षो भेदास्तदुक्तयार
कपेचाशत्तदाह॥

का२
१०४०४
पत्स्यधितो बोधश्चमत्कारकारी स एव व्यंजकत्वं प्राप्नोति॥ एवमन्येषामपि बोद्धव्यं॥ वर्णरचनानां व्यंजकत्वं गुणस्वरूप
उ निरूपणे उदाहरिष्यते। अपि शब्दा सबंध्येना द्रप्रदि षुण वंरसादीनां प्रबंधा गति तसेदास्यासहषङ्भेदाः॥ भेदास्तदेकपंचाश
दाख्याताः॥ तेषां चान्योन्ययोजनेसंकरेण त्रिरूपेण संसृष्ट्या चैकरूपया॥ न केवलं शुद्धा एव कृपं चाशद्भेदा भवंति॥
यावत्तेषां स्वप्रभेदैरेकपंचाशता तासंत्रायास्यदत्वेनानुग्राह्यानुग्राहकतयैकव्यंजकानुप्रवेशेन चेति त्रिविधेन संकरेण प
रस्परनिरपेक्षस्वरूपयैक प्रकारया संसृष्ट्या चेति चतुर्गुणने वेदखाब्धिवियच्चंद्रश्चंद्राः शुद्धभेदैः सह शरेषुयुगखेंदवः। यु
राईश्वण प्राघुणिका देवर जायया सुभगधिमपितेभणिता रोदिति पथ्या श्रागवलक्षी गर्हेनुनीयतां वराकी॥ अत्रानुनय
किमुपभोगलक्ष्णार्थांतरसंक्रमितः किमनुरणन न्यायेनोपभोगस्य व्यंग्यो व्यंजक इति संदेहः॥ तथा स्निग्धश्यामलकांति
लिप्तवियतो वेल्लद्बलाका घना वाताः सीकरिणः पयोदसुहृदामानंदकेकाः कलाः कामं संतु दृढं कठोरहृदयो रामो
स्मि सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥ अत्र लिप्तेति पयोदसुहृदा [illegible] त्यासंततिरस्कृतवाच्ययोः
संसृष्टिः॥ ताभ्यां सह रामोस्मीत्यर्थांतरसंक्रमितवाच्यस्य अनुग्राह्यानुग्राहकतया रामपदे लक्षणैकव्यंजकानुप्रवेशेन चार्थां
तरसंक्रमितवाच्यसाध्वन्योः संकरः॥ एवमन्यदप्युदार्यं॥ इति काव्यप्रकाशे विद्यानिनिर्णयो नाम चतुर्थ उल्लासः॥ ७॥ ७॥ ७॥

(16)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं ध्वनौ निर्णीते गुणीभूतव्यंग्यस्य प्रभेदानाह ॥ अगूढमपरस्यांगं वाच्यसिद्ध्यंगमस्फुटं ॥ संदिग्धतुल्यप्राधान्ये का
क्वाक्षिप्तमसुंदरं ॥ व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदास्मृताः ॥ कामिनीकुचकलशवद्गूढं चमत्करोति अगूढं तु स्फुटतया
वाच्यायमानमिति गुणीभूतव्यंग्यमेव । यथा । यस्यासुहृत्कृततिरस्कृतिरेत्य तप्तसूचीव्यधव्यतिकरेण युनक्ति क
र्णौ कांचीगुणग्रथनभाजनमेष सोस्मि जीवन्न संप्रति भवामि किमाहवामि ॥ अत्र जीवन्निर्धांतरसंक्रमित वाच्यस्य । न२
उन्निद्रकोकनदरेणुपिशंगितांगा गायंति मंजु मधुपा गृहदीर्घिकासु ॥ एतच्चकास्ति च रवेर्नवबंधुजीवपुष्पच्छदाभमुदया
यं चलचुंबिबिंबं ॥ अत्र चुंबनस्यात्यंततिरस्कृतवाच्यस्य ॥ अत्रासीत्फणिपाशबंधनविधिः शक्त्या भवद्देवरे गाढं वक्ष
सि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ॥ दिव्यैरिंद्रजिदत्र लक्ष्मणशरैर्लोकांतरं प्रापितः केनाप्यत्र मृगाक्षि राक्षसपतेः कृ
त्ता च कंठाटवी ॥ अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुस्वानरूपस्य ॥ तस्याप्यत्रेति तु युक्तः पाठः ॥ अपरस्य रसादेर्वाच्य
स्य वाक्यार्थीभूतस्यांगं रसादि अनुरणनरूपं वा ॥ अयं स रसनोत्कर्षी पीनस्तनविमर्दनः ॥ नाभ्यूरुजघनस्पर्शी
नीवीविस्रंसनः करः ॥ अत्र शृंगारः करुणस्य ॥ कैलासालयभाललोचनरुचा निर्वर्तितालक्तकव्यक्तिः पाद
नखद्युतिर्गिरिभुवः सा वः सदा त्रायतां ॥ स्पर्धाबंधसमृद्धये व सुदृढं रूढा यया नेत्रयोः कांतिः कोकनदानुकाररसा
सद्यः समुत्सार्यते ॥ अत्र भावस्य रसः अत्युच्चाः परितः स्फुरंति गिरयः स्फारास्तथांभोधयस्तानेतानपि बिभ्रती

श्री ११९८ — श्री ११९८

कं किमपि न श्रांतासि तुभ्यं नमः ॥ आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद्भुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो
मुद्रिताः ॥ अत्र भूविषयो रत्याख्यो भावो राजविषयस्य भावस्य ॥ बंदीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां
श्लिष्यंति प्रणमंति लांति परितश्चुंबंति तैः सैनिकाः ॥ अस्माकं सुकृतैर्दृशोर्निपतितोस्यौचित्यवारांनिधे विध्वस्ता विप
दोखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे ॥ अत्र भावस्य रसाभासो भावाभासौ प्रथमद्वितीयार्द्धयोः । अविरलक
रवालकंपनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ॥ ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥ अत्र भावस्य प्रश
मः ॥ साकं कुरंगकदृशा मधुपानलीलां कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते । अन्याभिधायि तव नाम विभो गृहीतं केना
पि तत्र विषमामकरोदवस्थां ॥ अत्र त्रासस्योदयः ॥ असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विस्रंभेष्वथ च
ल रसिकः शैलदुहितुः प्रमोदं वो दिश्यात्कपटवटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥ अत्रावे
गधैर्ययोः संधिः ॥ पश्येत्कश्चिच्चल चपले रे का त्वराहं कुमारी हस्तालंबं वितर हहहा व्युत्क्रमः क्वासि यासि ॥
इत्थं पृथ्वीपरिवृढ भवद्विद्विषोरण्यवृत्तेः कन्या कंचित्फलकिसलयान्याददानाभिधत्ते ॥ अत्र शंकासू
याधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता ॥ एते च रसवदाद्यलंकाराः ॥ यद्यपि भावोदयभा
वसंधिभावशबलत्वानि नालंकारतयोक्तानि तथापि कश्चिद्ब्रूयादित्येवमुक्तं ॥ यद्यपि स नास्ति कश्चिद्

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यंग्यो यत्र ध्वनिगुणीभूतव्यंग्ययोः स्वप्रभेदादिभिस्सह संकरः संसृष्टिर्वा नास्ति तथापि प्राधान्येन व्यपदे-
शा भवंतीति क्वचित्केनचिद्व्यवहारः। जनस्थाने भ्रांतं कनकमृगतृष्णांधितधिया वचो वैदेहीति प्रतिपदमु- तद्धि२
वे२ दश्रु प्रलपितं। कृतालंकाभर्तुर्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कुशलवसुता न त्वधिगता॥ अ-
त्र शब्दशक्तिमूलोनुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्यतां नीयते। अर्थस्य संप्राप्तिवियोगादि- स्पोग
स्प२ संभुग्गोगी मंथोऽजिनी कृविदपि स्वपिति त्रियामः। एतां प्रसादयति पश्य शनैः प्रभाते तन्वंगि पादपतनेन सह-
स्ररश्मिः॥ अत्र नायकवृत्तांतोर्थशक्तिमूलो वस्तुवस्तुरूपो निरपेक्षः रविकमलिनीवृत्तांताध्यारोपेणैव स्थि-
तः। वाच्यसिद्ध्यंगं यथा भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादं। मरणं च जलदभुजगजं प्र-
सह्य कुरुते विषं वियोगिनीनां॥ अत्र हालाहलं व्यंग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृत्॥ यथा वा गच्छाम्यच्युत
दर्शनेन भवतः किं तृप्तिरुत्पद्यते किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा॥ इत्यामंत्रणभंगिसूचित-
वृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्कराचिततनुर्गोपीं हरिः पातु वः॥ अत्र अच्युतादिपदव्यंग्यमामंत्रणादिवाच्य- ए
श्री क१ स्य एतत्रैव वक्तृगतत्वेन॥ अपरत्र भिन्नवक्तृगतत्वेनेत्यनयोर्भेदः॥ अस्फुटं यथा॥ अदृष्टे दर्शनोत्कंठा श्री
त
॥१८॥ ॥१९॥

२१ दृष्टे विच्छेदभीरुता। नादृष्टेन न दृष्टेन भवता लभ्यते सुखं॥ अत्रादृष्टे न यथा भवति वियोगभयं च यथा नोत्पद्यते तथा
क्लि२ कुर्याः इति क्लिष्टं। संदिग्धतुल्यप्राधान्यं यथा। हरस्तु किंचित्परिवृत्तधैर्यश्चंद्रोदयारंभ इवांबुराशिः॥ उमामुखे
बिंबफलाधरोष्ठे व्यापारयामास विलोचनानि। अत्र परिचुंबितुमैच्छदिति किं प्रतीयमानं किं वा विलोचनव्यापा-
रणं वाच्यं प्रधानमिति संदेहः। ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जामदग्न्यस्तथा मित्रमन्यथा दुर्मना-
यते॥ अत्र जामदग्न्यः सर्वेषां क्षत्राणामिव रक्षसां क्षयं करिष्यतीति। व्यंग्यस्य वाच्यस्य च समं प्राधान्यं। काक्वा-
क्षिप्तं यथा॥ मथ्नामि कौरवशतं समरे न कोपात् दुःशासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनो-
रू संधिं करोतु भवतां नृपतिः पणेन॥ अत्र मथ्नाम्येवेत्यादि व्यंग्यं वाच्यनिषेधसहभावेन स्थितं। असुंदरं य-
था वाणीरकुडंगुड्डीणसउणिकोलाहलं सुणंतीए। घरकम्मवावडाए बहुए सीअंति अंगाइं॥ अत्र दत्तसंकेतः क-
श्चिल्लतागहनं प्रविष्ट इति व्यंग्यात् सीदंत्यंगानीति वाच्यं सचमत्कारं॥ ॥ एवां भेदा यथायोगं वेदितव्याश्च पूर्ववत्।
यथायोगमिति॥ व्यं॰ ऽप्यंते वस्तुमात्रेण यदालंकृतयस्तदा॥ ध्रुवं ध्वन्यंगता तासां काव्यवृत्तेस्तदाश्रयात्॥ इति ध्वनि

18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारोक्ता। इत्थं वस्तुमात्रे यत्रालङ्कारो व्यज्यते तेन तत्र गुणीभूतव्यङ्ग्यत्वं। सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसं
करैः। सालङ्कारैरिति। तैरिवालङ्कारैरलङ्कारध्वनौ श्च तैस्तदुक्तं॥ ध्वनिर्ध्वनौ तास्सगुणीभूतव्यङ्ग्यैः। सालङ्कारैः
सह प्रभेदैः स्वैः। संकरसंसृष्टिभ्यां पुनरप्युद्योतते बहुधेति॥ अन्योन्ययोगादेवं स्याद्भेदसंख्यातिः
भूयसी॥ एवमनेन प्रकारेणावान्तरभेदप्रभेदगणनेन नातिप्रभूततरगणना। तथाहि। शृङ्गारस्यैव भे
दप्रभेदगणनायामानन्त्यं का गणना सर्वेषां। संकलनेन पुनरस्य ध्वनेस्त्रयो भेदा व्यङ्ग्यस्य त्रिरूपत्वात्।
तथाहि॥ किंचिद्वाच्यतां सहते किंचित्त्वन्यथा। तत्र वाच्यतासहमविचित्रं विचित्रं चेति॥ अविचित्रं वस्तुमात्रं
विचित्रं त्वलङ्काररूपं॥ यद्यपि व्यङ्ग्यत्वे प्राधान्येन तदलङ्कार्यं तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते। रसा
दिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः॥ स हि रसादिशब्देन शृङ्गारादिशब्देन वाभिधीयते न चाभिधीयते। त
त्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याप्रतिपत्तेस्तदप्रयोगेऽपि विभावादिप्रयोगे प्रतिपत्तेश्चेत्यन्वयव्यति
रेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयत इति निश्चीयते॥ तेनासौ व्यङ्ग्य एव॥ मुख्यार्थबाधाद्यभावा
श्री ॥२०॥ न्न पुनर्लक्षणीयः॥ अर्थान्तरसंक्रमितात्यन्ततिरस्कृतवाच्ययोर्वस्तुमात्ररूपं व्यङ्ग्यं विना लक्षणैव नस्या श्री ॥२०॥

वतीति प्रागुक्तं प्रतिपादितं शब्दशक्तिमूले तु अभिधाया नियन्त्रणेनानभिधेयस्यार्थान्तरस्य तेन सहो
पमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वं॥ अर्थशक्तिमूलेऽपि विशेषसंकेतः कर्तुं न युज्यत इति सा
मान्यरूपाणां पदार्थानामाकांक्षासन्निधियोग्यतावशात् परस्परसंसर्गे यत्रापदार्थोऽपि विशिष्टरू
पो वाक्यार्थस्तत्राभिहितान्वयवादे का वार्त्ता व्यङ्ग्यस्याभिधेयतायां ये त्वाहुः॥ शब्दवृद्धाभिधे
यांश्च प्रत्यक्षेणानुपश्यति॥ श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥ अन्यथानुपपत्त्या तु बोधे
च्छक्तिं द्वयाश्रितां॥ अर्थापत्त्यैव बुध्यते संबन्धं त्रिप्रमाणकमिति प्रतिपादितादिशा देवदत्त गामानये
खुर त्यादौ उत्तमवृद्धवाक्यप्रयोगे देशाद्देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सत्यनेनास्माद्वा
क्यादेवंविधोऽर्थः प्रतिपन्न इति तच्चेष्टयानुमाय॥ तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाच्यवाच
कभावलक्षणं संबन्धमवधार्य बालस्तत्र व्युत्पद्यते। परतश्च गामानय देवदत्ताश्वमानय देवदत्त

(19)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०

र्थं न पेत्यादिवाक्यप्रयोगे तस्य तस्य ग्राहकस्य तं तमर्थमवधारयतीत्यन्वयव्यतिरेकाभ्यां प्रवृत्तिनि
वृत्तिकारि वाक्यमेव प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानामन्वितैरेव पदार्थैरन्विता
नामेव संकेतो गृह्यत इति विशिष्टा एव पदार्था वाक्यार्थो न तु पदार्थानां वैशिष्ट्यं ॥ यद्यपि क वाक्यां
तरप्रयुज्यमानान्यपि प्रत्यभिज्ञाप्रत्ययेन तान्येवेतानि पदानीति निश्चीयंत इति पदार्थांतरमात्रेणान्वि
तः पदार्थः संकेतगोचरस्तथापि सामान्यावच्छादितो विशेषरूपाए वासौ प्रतिपद्यते व्यतिषक्तानां प
दार्थानां तथाभूतत्वादित्यन्विताभिधानवादिनः तेषामपि मते सामान्यविशेषरूपः पदार्थः
संकेतविषय इत्यतिविशेषस्तु तो वाक्यार्थांतर्गतो संकेतितत्वाद वाच्य एव यत्र पदार्थः प्रतिपद्य
ते ॥ तत्र दूरेर्थांतरभूतस्य निःशेषच्युतेत्यादौ विधध्यादेश्च ॥ अन्वितोर्थोभिहितान्वये
श्री ॥२१॥ पदार्थांतरमात्रेणान्वितस्त्वन्विताभिधानेन्वितविशेषस्तु वाच्य एवेत्युभयनये प्य पि दा श्री ॥२१॥

र्थ एव वाक्यार्थः ॥ यदप्युच्यते ॥ नैमित्तिकानुसारेण निमित्तानि कल्प्यंत इति ॥ तत्र निमित्तत्वं कारकत्वं ज्ञापक
त्वं वा ॥ अज्ञातस्य प्रकाशकत्वं कारकत्वं ॥ ज्ञापकत्वं च अज्ञातस्य कथं ज्ञातत्वं च संकेतेनैव सहचारितमात्रे ॥ एवं च निमित्तत्वमानस्य
संकेतविषय निमित्तत्वं यावन्न विशिष्टं नैव नैमित्तिकस्य प्रतीतिरेव कथमिति नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यंत इ
ति अविचारिताभिधानं यच्चाभिदधति सोयमिषोरिव दीर्घदीर्घतरो व्यापार इति ॥ यत्परः शब्दः स शब्दार्थ इति च
विधिरेवात्र वाच्य इति तेषां तात्पर्यं ज्ञातात्पर्यं वाच्योयुक्तेः देवानांप्रियाः ॥ तथा हि भूतभव्यसमुच्चारणे भूतं भ
व्यायोपदिश्यत इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियाभिनिर्वर्तकस्य क्रियाभि
संबंधात्साध्यायमानतां प्राप्नुवंति ॥ ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद्विधीयते यथा ॥ ऋत्विक्प्र
चरणे प्रमाणांतरात्सिद्धे लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यत्र लोहितोष्णीषत्वमात्रं विधेयं ॥ एवमन
न्यतः सिद्धे अग्निहोत्रे जुहोतीत्यादेः करणत्वमात्रं विधेयं ॥ क्वचिदुभयविधिः ॥ क्वचित्त्रिविधि
रपि यथा रक्तं पटं वयेत्यादौ एकविधिर्द्विविधिस्त्रिविधिर्वा यत्तत्र यदेवाविधेयं तत्रैव तात्प
र्यमित्युपात्तस्यैव शब्दस्यार्थे तात्पर्यं न तु प्रतीतिमात्रे ॥ एवं हि नरो धावतीत्यादावपरार्थे चि
कचिनो स्पर्शे स्यात् ॥ यत्तु विषं भक्षय मा चास्य गृहे भुंक्थाः इत्यत्र दूरे न भोक्तव्यमित्यत्र ता
त्पर्यमिति स एव वाक्यार्थ इत्युच्यते ॥ तत्र वक्ता एव वाक्यानामस्वतंत्रार्थः ॥ न चोत्र्याते वाक्य

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जि १

योऽर्द्धयोरर्गी[illegible]भाव इति विषभक्षणाद्वाक्यस्य सुहृद्वाक्यत्वेनांगतात्कल्पनीयेति विषभक्षणा
दपि दुष्टमेतद्गृहे भोजनमिति सर्वथा मास्य गृहे भुंक्था इत्येतत्पात्रतात्पर्यार्थ एव तात्पर्यं ॥
यच्चिव शब्दस्मृतेरनंतरं यावानर्थोऽधिगम्यते तावति शब्दस्याभिधैव व्यापारस्तत्कथं ब्राह्म
णपुत्रस्ते जातो ब्राह्मण कन्या ते गर्भिणीत्यादौ हर्षशोकौ नाम पितृवाच्यौ स्तः ॥ कुस्मात्प्रलक्षणा ल २।४
क्षणीयेप्येवं दीर्घदीर्घाभिधाव्यापारादेव प्रतीतिसिद्धेः ॥ किमिति च श्रुतिलिंगवाक्यप्रक
रणस्थानसमाख्यानां पूर्वपूर्वबलीयस्त्वं ॥ इत्यन्विताभिधानवादेपि विधेरपि सिद्धं व्यंग्य
त्वं ॥ किंच ॥ कुरु रुचिमिति पदयोर्वैपरीत्ये काव्यांतर्वर्त्तिनि कथं दुष्टत्वं नह्यत्रासभ्योऽर्थः पदा
र्थांतरैरन्वितइत्यनभिधेय एव सेच मादिवपरित्याज्यं स्यात् ॥ यदिच वाच्यवाचकत्वव्य
तिरेकेण व्यंग्यव्यंजकभावो नाभ्युपेयते तदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनां
मनित्यदोषत्वं इति विभागकरणमनुपपन्नं स्यात् ॥ न वानुपपन्नं ॥ सर्वस्यैव वि
भक्तत्या प्रतिभासात् ॥ वाच्यवाचकभावव्यतिरेकेण व्यंग्यव्यंजकनाश्रयणेनु व्यंग्यस्य
बहुविधत्वात्क्वचिदेव कस्यचिदेव विशेषेणोपपद्यत एव विभागव्यवस्था इदयं गसतंसंप्रति

श्री ॥२२॥

गोचनीयतां समागमप्रार्थनया कपालिन इत्यादौ पिनाकादिपदविलक्षणपर्यायेन किमिति कपाल्यादिप
दानां काव्यानुगुणत्वं ॥ अपिच ॥ वाच्योऽर्थः सर्वान्प्रतिपत्तॄन्प्रत्येकरूप एवेति नियतो मौन गृहगतोऽस्तमर्क
इत्यादौ वाच्योऽर्थः ॥ क्वचिदन्यथा भवति प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहाय
तया नानात्वं भजते ॥ तथाच ॥ गतोऽस्तमर्क इत्यतः सपत्नं प्रत्यवस्कंदनावसर इत्यभिसरणमुपक्रम्यता
मिति प्राप्तप्रायस्ते प्रेयानिति कर्मकरणान्निवर्त्तामह इति संध्याविधि ॥ पक्रम्यतामिति दूरं मा गा इति
सुरभयो गृहं प्रवेश्यंतामिति संतापोऽधुना न भवतीति ॥ विक्रेयवस्तूनि संगृह्यंतामिति नागतोऽद्य प्रेयानि
त्यादिरनवधिर्व्यंग्यार्थस्तत्र तत्र प्रतिभाति ॥ वाच्यव्यंग्ययोर्निःशेषेत्यादौ निषेधविध्यात्मना मात्सर्यमु
त्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदंतु सेव्या नितंबाः किमु भूधराणामुत स्मरस्मेरविलासिनीनां ॥
इत्यादौ संशयरूपेण शृंगाराद्यन्यतरगतनिश्चयरूपेण ॥ कथमवनिपदर्पो यन्निशातासिधाराद
लनगलितमूर्ध्नां विद्विषां स्वीकृता श्रीः ॥ ननु तव निहतारेरप्यसौ किं न नीता त्रिदिवमपगतांगैर्वल्लभा की
र्त्तिरेभिरित्यादौ निंदास्तुतिवपुषा स्वरूपस्य ॥ पूर्वपश्चाद्भावेन प्रतीतेः कालस्य ॥ शब्दाश्रयत्वेन
शब्दतदेकदेशतदर्थवर्णसंघटनाश्रयत्वेन चाश्रयस्य ॥ शब्दार्थशासनज्ञानेन प्रकरणादिसहाय यदि २
प्रतिभाने र्मल्यसहितेन तेन चावगम इति निमित्तस्य बोद्धृमात्रविदग्धव्यपदेशयोः प्रतीतिमात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वमल्लसोऽश्वकरणात्कार्यस्य गतोऽस्तमर्क इत्यादौ प्रदर्शितनयेन संख्यायाः॥ कस्स व ण होइ रोसो
दट्ठूण पिआइ सव्वणं अहरं॥ सभमरपउमग्घाइ वारिअवामे सहसु इण्हिं इत्यादौ
सखीतत्कान्तादिगतत्वेन विषयस्य भेदेपि यद्येकं तत्र किंचिदपि नीलादौ भेदो न
स्यात्॥ उक्तं हि॥ अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च॥ वा
चकानामर्थापेक्षा व्यंजकानां तु तदनपेक्षत्वमपीति न वाचकत्वमेव व्यंजकत्वं॥ किं च
वानीरकुडुंगे इत्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूप एव यत्र विश्राम्यतीति तत्र
गुणीभूतव्यंग्ये तात्पर्यं स्वतोप्यर्थः॥ स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य
पार्श्वस्य विषयतामवलंबतां॥ ननु रामोस्मि सर्वं सहे इति रामेण प्रियजीवितेन
तु कृतं॥ प्रेम्णः प्रियेनोचितमिति॥ रामोसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं प
रामित्यादौ लक्षणीयोऽर्थो नानात्वं भजते॥ विशेषव्यपदेशहेतुश्च भवति गत
दवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति॥ कोयं नूतनः प्रतीयमानो ना
म उच्यते॥ लक्षणीयस्यार्थस्य नानात्वेपि अनेकार्थशब्दाभिधेयवन्नियतत्वमेव॥

श्री ॥२३॥

श्री ॥२३॥

न खलु मुख्येनार्थेनानियतसंबंधो लक्षयितुं शक्यते॥ प्रतीयमानस्तु प्रकरणादिविशेषव
शेन नियतसंबंधोऽनियतसंबंधः संबंधसंबंधश्च द्योत्यते॥ तत्र अत्ता एत्थ णिमज्जइ एत्थ
अहं दिअसअं पलोएहि। मा पहिअ रत्तिअंधअ सेज्जाए मह णिमज्जिहिसी इत्यादौ विवक्षि
तान्यपरवाच्ये ध्वनौ मुख्यार्थबाधः॥ तत्कथमत्र लक्षणा॥ लक्षणायामपि व्यंजनमवश्यमा
श्रयितव्यमिति प्रतिपादितं॥ यथा च समयव्यपेक्षाभिधा तथा मुख्यार्थबाधादित्रय
समयविशेषसव्यपेक्षा लक्षणा॥ अत एवाभिधापुच्छभूता सेत्याहुः॥ न च लक्षणा
त्मकमेव ध्वननं॥ तदनुगमेन तस्य दर्शनात्॥ न च तदनुगतमेवाऽभिधावलंबनेनापि त
स्य भावाद्यच्छोभयानुसारेण॥ अवाचकवर्णानुसारेणापि तस्य दृष्टेः॥ न च शब्दानुसा
रेण च॥ अशब्दात्मकनेत्रविभावविलोकनादिगतत्वेनापि तस्य प्रसिद्धेः॥ इत्यभिधाता
त्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती ध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव॥
तत्र॥ अत्ता एत्थ इत्यादौ नियतसंबंधः॥ कस्स व ण होइ रोसो इत्यादावनियतसंबंधः॥

(२२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवराअरएलग्गछाव मंद दूण पाहि कमलत्थं ॥ हरिणो दाहिणणअणं रसाउलस्स त्तिढघे
इत्यादौ संबंधसंबंधः ॥ तत्र हि हरिपदेन दक्षिणेन नयनस्य सूर्यात्मकता व्यज्यते ॥ तन्नि
मीलनेन सूर्यस्यास्तमयस्तेन पद्मस्य संकोचस्ततो ब्रह्मपात्र्गगनं तत्र सति गोप्योगस्यादर्शी
नेनिर्यंत्रणं निधुवनविलसितं ॥ अखंडबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यो वाक्यमेव वाचक
मिति येप्याहुस्तैरप्यविद्यापदपतितैः पदपदार्थकल्पिताकर्तव्यैवेति तत्स्वक्ष
प्यवक्तव्यमुक्तोदाहरणादौ विध्यादिर्व्यंग्य एव ॥ ननु वाच्यादसंबद्धतावन्न प्रतीयते ।
यतः कुतश्चिद्यस्य कस्यचिदर्थस्य प्रतीतिप्रसंगात् ॥ एवं च संबंधो व्यंग्यव्यंजकभा
वो प्रतिबंध एव व्यंग्येन भवतीति व्याप्तत्वेन नियतधर्मिनिष्ठत्वेन च त्रिरूपाल्लिंगाल्लिंगि
निज्ञानमनुमानं यत्र द्रूपः पर्यवस्यति ॥ तथाहि ॥ भम धम्मिअ वीसद्धो सो सुणहो अ
ज्ज मारिओ तेण गोलाणइकच्छकुडंगवासिणा दरिअसीहेण ॥ अत्र गहे भ्रमनिषेधस्या
भ्रमणं विहितं ॥ गोदावरीतीरे सिंहोपलब्धेर्भ्रमणमनुमापयति ॥ यद्यद्भीरुभ्रमणं तत्त

श्री ॥२४॥

श्री ॥२४॥

द्भयकारणनिवृत्त्युपलब्धिपूर्वकं गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः
अत्रोच्यते ॥ भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण वान्येन चैवंभूतेन हे
तुना सत्यपि भयकारणे भ्रमतीत्यनैकांतिको हेतुः ॥ अतो बिभ्यदपि वीरत्वेन
सिंहान्न बिभेतीति विरुद्धोपि ॥ गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा
न निश्चितोपि तु वचनात् ॥ ननु वचनप्रामाण्यमर्थेनाप्रतिबंधादि
त्यसिद्धश्च ॥ तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः ॥ तथा निःशेषच्युतेत्या
दौ गमकतया यानि चंदनच्यवनादीन्युपात्तानि तानि कारणांतरतोपि भवंति ॥
अतश्चात्रैव स्नानकार्यत्वेनोक्तानीति नोपभोग एव प्रतिबद्धानीत्यनैकांति
कानि ॥ व्यक्तिवादिनाधमपदसहायानामेषां व्यंजकत्वमुक्तं ॥ न चात्राधमत्वं प्रमाण

23

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिपन्नमिति कथमनुमानं। एवंविधादर्थादेवंविधोर्थ उपपत्त्यनपेक्षत्वेपि प्रकाशत
इति व्यक्तिवादिनः पुनस्तददूषणं॥ ॥छ॥ काव्यप्रकाशे ध्वनिगुणीभूतव्यंग्यसंकीर्ण
प्रभेदनिर्णयो नाम पंचम उल्लासः॥ छ॥ शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतं॥ गुणप्रा
धान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः॥ ननु शब्दचित्रेर्थस्याचित्रत्वमर्थचित्रे वा शब्द
स्य तथाप्युक्तं॥ रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः॥ नकांतमपि निर्भूषं विभा
ति वनितानानं ना॥ रूपकादिमलंकारं बाह्यमाचक्षते परे॥ सुपां तिङां च व्युत्पत्तिं वाचां
वांछंत्यलंकृतिं॥ तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी॥ शब्दाभिधेयालंकारभेदादि
ष्टं द्वयं तु न इति॥ शब्दचित्रं यथा॥ प्रथममरुणच्छायस्तावत्ततः कनकप्रभस्तदनु
विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः॥ उदयति ततो ध्वांतध्वंसक्षमः क्षणदामुखे स
रसबिसिनीकांडच्छेदच्छविर्मृगलांछनः॥ अर्थचित्रं यथा॥ ते दृष्टिमात्रपतिता अपि कस्य
नात्र क्षोभाय पक्ष्मलदृशामलकाः खलाश्च॥ नीचाः सदैव सविलासमलीकलग्ना ये कालतां

श्री ११२५॥ श्री ११२५॥

कुटिलतां च न संत्यजंति॥ यद्यपि सर्वत्र काव्ये ततो विभावादिरूपतया रसपर्यवसानं तथापि
स्फुटरसस्यानुपलंभाद्व्यंग्यमेतत्काव्यद्वयमुक्तं॥ अत्र शब्दार्थालंकारभेदाव बहवः संतो वालंकार
निर्णये निरूप्यंते॥ छ॥ इति काव्यप्रकाशे षष्ठ उल्लासः॥ छ॥ छ॥ काव्यस्य रूपं निरूप्य दोषाणां
सामान्यलक्षणमाह॥ मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः॥ उभयोपयोगिनः
स्युः शब्दाद्यास्तेन तेष्वपि सः॥ हतिरपकर्षः॥ शब्दाद्या इत्याद्यग्रहणात् वर्णरचने॥ विशेषलक्ष
णमाह॥ दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थं॥ निहतार्थमनुचितार्थं निरर्थकमवाचकं
त्रिधाश्लीलं॥ संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टं॥ अविमृष्टविधेयांशं विरुद्धमतिकृत्स
मासगतमेव॥ श्रुतिकटु परुषवर्णरूपं दुष्टं॥ यथा॥ अनंगमंगलगृहापांगभंगितरंगितैः॥ आलि
गितः स तन्व्यंग्या कार्तार्थ्यं लभते कदा॥ अत्र कार्तार्थ्यमिति॥ च्युतसंस्कृति व्याकरणलक्षणहीनं य
था॥ एतन्मंदविपक्वतिंदुकफलश्यामोदरापांडुरप्रांतं हंत पुलिंदसुंदरकरस्पर्शक्षमं लक्ष्यते॥
तत्पल्लीपतिपुत्रि कुंजरकुलं कुंभाभयाभ्यर्थनादीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः॥
अत्रानुनाथत इति सर्पिषो नाथत इत्यादावाशिष्येव नाथतेरात्मनेपदं॥ नियतमाशिषि नाथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री ॥२६॥

Acc. No: 1100
Title:- काव्यप्रकाशटीका
पत्रे:-

इति ॥ अत्र याचनार्थस्तस्मान्नाथति स्तानेति पठनीयं ॥ अप्रयुक्तं ॥ तथाम्नातमपि कविभिर्नादृतं ॥
यथा ॥ यथायं दारुणाचारः सर्वदैव विभाव्यते ॥ तथा मन्ये दैवतोस्य पिशाचो राक्षसोथ
वा ॥ अत्र दैवतशब्दः ॥ दैवतानि पुंसि वेत्याम्नातोपि न केन विप्रयुज्यते ॥ असमर्थं यदर्थं
पठ्यते न च तत्रास्य शक्तिः ॥ यथा ॥ तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः ॥ सुरस्रोतस्विनी
मेष हन्ति संप्रति सादरं ॥ अत्र हन्तीति गमनार्थं ॥ निहतार्थं यदुभयार्थमप्रसिद्धेऽर्थे प्रयु
क्तं ॥ यथा ॥ यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन ॥ मुग्धा साध्वसतरलवि
लोकय परिरभ्य चुम्बिता सहसा ॥ अत्र शोणितशब्दस्य रुधिरलक्षणेनार्थेनोज्ज्वलीकृ
तोर्थो व्यवधीयते ॥ अनुचितार्थं यथा ॥ तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रि
भिरिष्यते च या ॥ प्रयान्ति तामाशुगतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः ॥
अत्र पशुशब्दः कातरतामभिव्यनक्तीत्यनुचितार्थं ॥ निरर्थकं पूरणमात्रप्रयोजनं चा
दिपदं यथा ॥ उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ॥ अभिवाञ्छितं प्रसिध्य

तु भवति युष्मत्प्रसादेन ॥ अत्र हिशब्दः ॥ अवाचकं यथा ॥ अवंध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ॥ अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषाद
रः ॥ अत्र जन्तुपदमदातर्यर्थे विवक्षितं ॥ तच्च नाभिधायकं ॥ यथा वा ॥ हा धिक्सा किल
तामसी शशिमुखी दृष्टा मया यत्र सा तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितं ॥ किं कु
र्मः कुशले सदैव विधुरो धाता न चेत्तत्कथं तादृग्यामवतीमयो भवति मे नो जीवलोकोधुना ॥
अत्र दिनमिति प्रकाशमयमित्यत्रार्थे वाचकं ॥ यच्चोपसर्गसंसर्गादर्थान्तरं गतं ॥ यथा ॥ जंघा
कांडोरुनालो नखकिरणलसत्केसरालीकरालः प्रत्यग्रालक्तकाभाप्रसरकिसलयो मंजु
मंजीरभृंगः ॥ भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापीसंभूतांभोजशोभां
विदधदभिनवो दंडपादो भवान्याः ॥ अत्र दधदित्यत्रार्थे विदधदिति ॥ त्रपेति व्रीडाजु
गुप्सामंगलव्यंजकत्वात् ॥ यथा ॥ साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ॥ तस्य
धीशालिनः कोन्यः सहेतारालितां भ्रुवं ॥ लीलातामरसाहतोन्यवनितानिःशंकदष्टा

27

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धरः कश्चिल्लोके सरहषिते स्तु णइव व्याभाल्येनेत्रे स्थितः॥ मुग्धाकुञ्जलिताननेन दधती
वायुं स्थितातस्य साभ्रांसा धूर्त्तेन तथा भवान तिस्मेतेतेनोत्रितांबुं बिता॥ मृदुपवनवि
भिन्नो मस्त्रिया याविनाशाद्धनरुचिरकलापो निःसपत्नोस्य जातः॥ रतिविलुलित
बंधे केशपाशे सुकेश्याः सतिकुसुमसनाथे कं हरेदेष बर्हः॥ एषु साधनवाका पुंवि
नाशाश्रद्धारीअहितव्यंजकाः॥ संदिग्धं यथा॥ आलिंगितस्तत्र भवान्संपदोऽजय
श्रिया॥ आशापरंपरां बंधां कर्णे हत्वादयां कुरु॥ अत्र बंधां हठाद् दूहात महि
लायां किं॥ न मस्यमीति संदेहः॥ अप्रतीतं यत्केवलं शास्त्रे प्रसिद्धं॥ यथा॥ सम्यग्ज्ञानमहाज्योतिर्दलिताशयता जुषः। विधीयमानमप्येतन्न भवेत्कर्मबंध
ने॥ अत्राशयपदं वासनापर्यायो योगशास्त्रादावेव प्रयुक्तः॥ ग्राम्यं केवले केवलोक्तिस्थितेय धोराकावि
श्री ॥२७॥ भावराकांतसंक्रांतघतितेमुखे। तपनीयशिलाशोभा कटिश्च हरते मनः॥ अत्र कटिरिति॥ नेयार्थं काश्चिन्नैव श्री ॥२७॥

मी
त्वशक्तितः इति यन्निषिद्धं लाक्षणिकं यथा॥ शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियं। करोति ते मुखं तन्वि चपेटापा
तनातिथिं॥ अत्र चपेटापातनेन निर्जितत्वं लक्ष्यते॥ अथ समासगतमेव दुष्टमिति संबंधः। अन्यत्तु केवलं समासगतं च॥ क्लि
ष्टं यतोर्थप्रतिपत्तिर्व्यवहिता यथा॥ अत्रिलोचनसंभूतज्योतिरुद्गमभासिभिः। सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टि
तं॥ अत्र अत्रिलोचनसंभूतस्य चंद्रस्य ज्योतिरुद्गमनेन भासिभिः कुमुदैरित्यर्थे क्लिष्टं॥ अविमृष्टः प्राधान्येनानिर्दि
ष्टो विधेयांशो यत्र तद्यथा॥ मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधाराधौतेशांघ्रिप्रसादोपनतजय
जगज्जातमिथ्यामहिम्नां॥ कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां दोष्णां चैषां किमेतत्फलमिह
महिम्नो मिथ्यात्व मित्यर्थः नगरीरक्षणे यत्प्रयासः॥ अत्र मिथ्यामहिमत्वं नानुवाद्यं॥ अपि तु विधेयं॥ तथा च॥ स्रस्तां नितंबादवलंबमाना
पुनः पुनः केसरपुष्पकांची॥ न्यासीकृतां स्थानविदा स्मरेणाद्वितीयमौर्वीमिव कार्मुकस्य॥ अत्र मौर्वीं
द्वितीयामिति द्वितीयत्वमात्रमुत्प्रेक्ष्यं॥ यथा च॥ वपुर्विरूपाक्षमलक्ष्यजन्मता दिगंबरत्वेन निवेदितं वसु॥ (२८)
वरेषु [illegible] यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥ अत्र अलक्षिता जनिरिति वाच्यं॥ यथा च॥
आनंदसिंधुरतिचापलशालिचित्तसंदाननैकसदनं क्षणमप्यमुक्ता॥ या सर्वदैव भवता तदुदंतचिं

मध स्तर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१
काव्य०त्रा

अत्राकार्यविनामिति विवक्षितं ।९

तातांतिं तनोतितवसंप्रतिपत्तिर्विघ्नास्मात् । अत्र न मुक्तेति निषेधो विधेयः ॥ यथा ॥ नवजलधरः सन्नद्धो
ऽयं न दृप्तनिशाचरः सुरधनुरिदं दूराकृष्टं न तस्य शरासनं ॥ अयमपि पटुर्धारासारो न बाणप
रंपरा कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ॥ इत्यत्र न त्वमुक्ततानुवादेनात्र किं चिद्वि
हितं यथा ॥ जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ॥ अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥
अत्रात्रस्ताद्यनुवादेनात्मनो गोपनादि विरुद्धमिति । यथा ॥ सुधाकरकराकारविशारदविचेष्टि
तः ॥ अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे ॥ अकार्यमित्रमिति अप्रतीतिः । यथा वा ॥ चिरकालप
त्रा रिप्राप्तिलोचनानंददायिनः । कांता कांतस्य सहसा विदधाति गलग्रहं ॥ अत्र कंठग्रहमिति
वाच्यं । तथा ॥ न त्रस्तं यदि नाम भूतकरुणासंतानशांतात्मनस्तेन व्यारुजता धनुर्भगवतो देवा
द्भवानीपतेः ॥ तत्पुत्रस्तु मदांधतारकवधाद्विश्वस्य दत्तोत्सवः स्कंदः स्कंद इव प्रियोऽहमथ
वा शिष्यः कथं विस्मृतः ॥ अत्र भवानीपतेः पत्यंतरे प्रतीतिकरो ... ति । यथा वा ॥ रामो श्री
श्री ॥२८॥

नीपति १ ती १

॥२८॥

न
गौरपि यद्वाहनतां प्राप्तवतः सोऽपि गिरिसुतासिंहः ॥ सविधे निरहंकारः पायाद्वः सोंऽबिकारमणः ॥
अत्रांबिकारमण इति विरुद्धां धियमुत्पादयति ॥ ख्यातेऽपि दुःसमासगतं च यथा ॥ सादरेव सुधासांद्र
तरंगितविलोचना ॥ वर्षेनिर्जदनोर्डो यंकालब्धसमुपागतः ॥ एवमन्यदपि ज्ञेयं ॥ अप
स्यात्यक्तसंस्कारमसमर्थं निरर्थकं ॥ वाक्येऽपि दोषाः संत्येते पदस्यांशेऽपि केचन ॥ केचन ॥ न ... ग्रो ४
पुनः सर्वे क्रमेणोदाहरणानि सोऽध्येष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्प्सीत्सममंस्त बंधून् ॥
व्यजेष्ट षड्वर्गमरंस्त ॥ नीतौ समूलघातं न्यवधीदरींश्च ॥ ददातु वो दुःश्रवनो भीकांतां परं बु
२ नेड रं ॥ अंभस्कृता ... घतु दो ... रसं ... तार ॥ अत्र दुःश्रवं नेड्ढः ... बधिरो नेडम्कः ॥
सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः ॥ अब्जरुचिभास्वरस्ते भातितरामवनि
पश्लोकः ॥ अत्र सायकादयः शब्दाः खड्गाब्जचंद्रपराः पर्यायाः त्रारार्थतया प्रसिद्धाः ॥
खि १

K K S U LIBRARY RAMTEK 441 106 M1345 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 10:27
,TRANSFERRED=2020/10/23 at 10:31:08
,PAGES=27
,TYPE=STD
,NAME=S0004452
,Book Name=M-1345-KAVYAPRAKASH TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection